cover

वप्रणीता

शिका।

THE

PRIYADARSIKÂ

OF

S'RÎHARSHADEVA.

Edited with Notes and Prâkṛita Chhâyâ

BY

VISHṆU DÂJÎ GADRE',

HEAD CLERK, GOVERNMENT CENTRAL BOOK DEPÔT, BOMBAY.

(Registered for copy-right under the Government of India's Act XXV of 1867).

Bombay.

PRINTED AT THE "NIRṆAYA-SÂGARA" PRESS.

1884.

Price 8 *Annas.*

Digitized by Google

THE

PRIYADARSIKÂ

OF

SRÎHARSHADEVA.

Edited with Notes and Prâkṛita Chhâyâ

BY

VISHṆU DÂJÎ GADRÉ,

HEAD CLERK, GOVERNMENT CENTRAL BOOK DEPÔT, BOMBAY.

(Registered for copy-right under the Government of India's act XXV of 1867).

Bombay.

PRINTED AT THE "NIRNAYA-SÂGARA" PRESS.

1884.

Price 8 *Annas.*

Digitized by Google

Lmd L 1205.1

HARVARD
UNIVERSITY
LIBRARY

Digitized by Google

श्रीहर्षदेवप्रणीता

प्रियदर्शिका

नाम

नाटिका।

विष्णु दाजी गद्रे

इत्यभिधेन संशोध्य

प्राकृतछायया विषमपदबोधिन्या टिप्पण्या च

सह प्रकटीकृता।

सा च

मुम्बापुर्यां

निर्णयसागराख्ये मुद्रायन्त्रालये तद्यन्त्रालया-

धिपतिना मुद्रिता।

शालिवाहनशकाब्दाः १८०६

क्रिस्तशकाब्दाः १८८४

मूल्यं रूप्यकार्धम्।

Digitized by Google

Digitized by Google

Translated by G. Strehly —
Bibliothèque Elzévirienne, vol. LVIII.

PREFACE.

This little Sanskrit play entitled the Priyadars'ikâ is said, like the Nâgânanda and the Ratnâvalî, to have been composed by the king S'riharshadeva*. As regards the time when this king flourished, there is a difference of opinion. According to Professor Wilson (see his work on the Hindu Theatre) he reigned over Kâshmir in the beginning of the 12th century, and according to others, about the 6th century A. D.

It is to be much regretted that this little but beautiful piece of dramatic composition should not have received, up to this time, such attention as it deserved, from our learned men, especially when in point of dramatic value and literary merit it cannot be said to be inferior to the other two plays of the author, which enjoy so much popularity among the learned men both of this and of the Western countries.

It is a very remarkable circumstance that Professor Wilson, in his celebrated work on the Hindu Theatre in which he has noticed almost all the Sanskrit dramas extant in this country, does not make any mention of this play. This circumstance alone is quite enough to prove that this play was not known to him.

Recently Pandit Jîvânanda Vidyâsâgara, the well-known publisher of Sanskrit works in Calcutta, has published an edition of this drama, but it is so much incorrect that scarcely a line is gone through without finding several mistakes and misprints. Besides this, he has not given in his edition 'Chhâyâ' or Sanskrit translation of the Prâkṛit passages in which this drama abounds; and the commentary or rather

* Professor H. H. Wilson says in his work on the Hindu Theatre:— 'He (S'rîharsha) was the reputed author of several works, being, however, in fact only the patron, the compositions bearing his name being written, the author of the Kâvyaprakâs'a asserts, by Dhâvaka and other poets.'

Digitized by Google

the explanatory notes which he has given to explain th verses, mislead the reader instead of leading him to under stand correctly the text. This remark, however, is neithe meant to depreciate the value of Pandit Jîvânanda's labour nor to question his literary ability, considering his helplessnes in procuring a correct manuscript* to base his edition upon On the contrary, it must be admitted to his great credit tha he has done good service by publishing this long neglected work, however incorrect it may be, and thereby rescuing i from oblivion.

The plot of this play is an invention of the author, as i appears to have no foundation in the Kathâsaritsâgara o Somadeva from which the plots of the Ratnâvalî and th Nâgânanda have been derived. In its principal features however, it very much resembles the plot of the Ratnâvali It is in fact very simple and is drawn from very ordinary circumstances of daily life; but the author has displayed so much skill and ingenuity in its conception and development, that it does not fail to be interesting and at the same time to awaken in the mind of the reader a feeling o admiration for the great imaginative power and literary abi lity possessed by the author. We give below for our reader a brief sketch of the plot the perusal of which will justif our remarks.

Dṛidhavarmâ, the king of Anga, had a beautiful daughte whose name was Priyadars'ikâ. Fascinated by her charms, th king of Kalinga asked her father for her hand; but Dṛidhavarm declined, and pledged her hand to Vatsarâja, the king of Kaus'âm bî. Kalinga took offence at this conduct and, in revenge, led hi army against Dṛidhavarmâ whom he defeated and made prisoner During the confusion that followed, the Kanchukî (mace-bearer) of Dṛidhavarmâ fled away with Priyadars'ikâ, whom he left in the Vindhya mountains under the protection of a forest-king named Vindhyaketu, who was a friend of her father.

* Pandit Jîvânanda, in answer to my letter requesting him to lend me the manuscript from which he published his edition, wrote to me to say that the only Ms. which he had been able t procure was very old, worn-out and worm-eaten, and that ever he had then unfortunately lost.

Digitized by Google

In the mean time, Vatsarâja had sent his general Vijayasena ·ith an army against Vindhyaketu,* who was slain in the battle hat ensued, and Priyadars'ikâ, who was found in his abode, was eized and taken to Vatsarâja supposing her to be the daughter of 'indhyaketu. Vatsarâja ordered her to be sent to his queen 'âsavadattâ with instructions to treat her as her sister and edu- ate her in all the fine arts that became princesses, such as sing- ng, dancing, music, and to inform him when she came to age, so hat she might be duly married.

This Priyadars'ikâ is the heroine of this play. She did not isclose her real name to any body while she lived with the ueen. Having been found in a forest (Araṇya) she was called y the name of Âraṇyakâ.

The mothers of Vâsavadattâ and Priyadars'ika were sisters, nd consequently the two daughters were related to each other as ousins. At first, Vâsavadattâ did not know that her cousin lived vith her as her maid-servant; and Priyadars'ikâ also, on the ther hand, was not aware that she was residing in the family of he king to whom she was betrothed.

One day, by order of the queen, Âraṇyakâ with another maid- ervant went to a royal garden to get some lotuses and other flowers or her mistress. There she happened to see the king who in his urn was struck with her uncommon beauty and loveliness. First ıe did not know who she was, but when he came to know from her onversation with her companion that she was a princess and was nmarried, he fell in love with her, and became anxious as to how ıe would be able to secure her hand. On the other hand, Âraṇya- :â also, when she became aware that the person, who attracted ıer attention so much, was the very person Vatsarâja to whom he was betrothed by her father, fell in love with him.

This reciprocal love could not be kept long a secret from 'asantaka the humorous attendant of the king, Manoramâ an ntimate friend of Âraṇyakâ, and Sânkṛityâyanî, an old woman the royal family. They soon discovered signs of their mutual ve, and held consultation in order to devise some plan bring about their union. They did not dare ask Vâsavadattâ give her consent to this match; because they knew well hat she would never like it. They then informed the king of heir plan, and it was settled that for the amusement of the

* The author does not give any reason for this expedition.

Digitized by Google

Play within play

queen, the adventures of Vatsarâja,—i. e. how he was tak prisoner by the father of Vâsavadattâ, how she was plac under his tuition in music, how he influenced her mind, how managed to steal away with her from the prison, and ultimat how he was married to her,—should be represented on the sta where Âraṇyakâ was to take the part of Vâsavadattâ and Mar ramâ was to represent the king. It was then decided that Mar ramâ, just at the time of her appearance on the stage in the d guise of the king, should contrive to disappear and the king hi self should go forward and act his own part. By this cont vance Âraṇyakâ and Vatsarâja were brought together and we united in wedlock according to the form of marriage call Gândharva.

While these acts were being represented on the stage, certa events of a suspicious nature occurred at which the queen was ve much offended, and when she knew that the part of the king w acted by the king himself, her wrath knew no bounds. She the ordered Âraṇyakâ to be confined in a room and left the pla house greatly irritated. The king seeing his plan thus frustrate felt much ashamed and began to court her favour.

We have said above that Kalinga had dethroned Dṛidhava mâ and made him prisoner. Vatsarâja, on receiving that intel gence had already despatched Vijayasena his general with army to defeat Kalinga and re-establish Dṛidhavarmâ on h throne. Vijayasena accomplished these objects and returned Kaus'âmbi with Dṛidhavarmâ's Kanchukî to communicate to Va sarâja and the queen these joyful tidings. While he was relati to them the events of his campaign, Manoramâ came in, all o sudden, and told Vâsavadattâ that Âraṇyakâ had poisoned hers and would soon die if speedy measures were not taken to counte act the effect of the poison.

Just at this juncture, Dṛidhavarmâ's Kanchukî, during conversation with the king, dropped a hint of Priyadars'ikâ's appearance from the abode of Vindhyaketu where he had left for her safety. This was a shocking news to Vâsavadattâ felt much afflicted for the loss of her cousin; but leaving grief aside, she ordered Manoramâ to fetch Âraṇyakâ before When she was brought in, the Kanchukî, to his great astonis ment, recognized her at once to be Priyadars'ikâ the daughte his master Dṛidhavarmâ and began to lament her fate. Vâs

Digitized by Google

;tâ also, when she knew from the Kanchukî that the poisoned l, who was lying before her struggling against death, was none ıer than her own dear cousin Priyadars'ikâ, felt deeply aggriev- at her misfortune and her own bereavement. She, however, ew that the king was well versed in mystic cures for poison ich he had learnt in the Pâtâla, and, therefore, begged him nestly to save her cousin. The life of our heroine was thus ed and ultimately with Vàsavadattâ's consent she was wedded Vatsarâja.

With a view to offer to the public, an edition of this ıtikâ, as correct as possible, I have been, for nearly the last ee years, trying to procure correct manuscripts from eral places where I thought it likely to get them, but all attempts were fruitless until at last I could get copies of ee manuscripts from the palace library at Tanjore. Of ese, one was written in the Devanâgarî, the other in the lugu and the third in the Grantha characters. All these re copied for me, the latter two being transliterated into evanâgarî characters.

Of all the three Mss. mentioned above, the Devanâgarî e was the best. I have, therefore, based my edition chiefly this Ms. In places, however, where the readings in it did t convey a good sense, I have substituted for them such ıdings as I thought better, selecting them from the two ıer Mss. On the authority of these Mss. I have also inserted d omitted some words here and there. All these substitu- ns, insertions, and omissions are given in the Appendix ırked B.

None of the Mss. has any commentary or chhâyâ of the àkṛita passages. The latter I have prepared and have en it at the foot of every page marking it with a figure responding to that given to the Prâkṛita passage in the t. Copious notes explaining difficult words and references also given (See Appendix A.) for the use of the students shing to study this Nâtikâ.

I am aware that, even after carefully collating the three s. which I have been able to procure, and preparing there- m this edition, the text is not sufficiently clear and satis-

Digitized by Google

factorily intelligible in a few places; but I am quite helple in this matter owing to the defective materials that I ha had to work with. I hope, however, that the defects will l removed when better materials will be available.

In editing this drama, my friends Messr. Nârâyaṇa Bâl krishṇa Godabolé B. A. and Govinda S'ankara S'âstrî Bâpat Sanskrit teachers, Elphinstone High School, Bombay, ha rendered me valuable assistance, for which I am much oblig ed to them. My thanks are also due to my friends M Vâmana S'âstrî Islâmapurakara for his help in preparing th Chhâyâ of the Prâkrita, and Mr. Kâs'înâtha Pâṇdurang Paraba for the pains he took in carrying this edition throug the press.

I cannot conclude this short preface without expressin a deep sense of gratitude that I feel for my friend Mr. T Ekanâthasvâmî Râo of Tanjore who, without any motive self-interest, was so kind as to furnish me with copies of th Mss. belonging to the palace library of Tanjore, and I frank ly confess, that but for his assistance I should not have bee able to bring out this edition.

Poona,
8th July 1884.

V. D. G.

Digitized by Google

DRAMATIS PERSONÆ.

Men.

धारः	... ...	The chief manager of the play.
वुकी (विनयवसुः)	...	The mace-bearer of Dṛidhavarmâ the king of Anga.
सराजः (उदयनः)	...	The king of Kaus'âmbi, hero of the play.
दूषकः (वसन्तकः)	...	The king's buffoon and confidential companion.
नयसेनः	... ...	The General of Vatsarâja's army.
ण्वान्	... ...	One of the ministers of the king Vatsa.

Women.

हारी (यशोधरा)	...	The female door-keeper.
सवदत्ता	... ...	The queen of Vatsarâja.
दीवरिका (चेटी)	...	Female servants.
श्चनमाला „		
रण्यका (प्रियदर्शिका)	...	Dṛidhavarmâ's daughter, heroine of the play.
गोरमा	... ...	A female attendant and friend of Âraṇyakâ.
कूत्यायनी	... ...	An old woman belonging to the royal family.

Digitized by Google

Digitized by Google

॥ श्रीः ॥

॥ प्रियदर्शिका ॥

॥ प्रस्तावना ॥

मव्याकुलदृष्टिरिन्दुकिरणैराह्लादिताक्षी पुनः
पश्यन्ती वरमुत्सुकाननमुखी भूयो ह्रिया ब्रह्मणः ।
र्ष्या पादनखेन्दुदर्पणगते गङ्गां दधाने हरे
स्पर्शादुत्पुलका करग्रहविधौ गौरी शिवायास्तु वः ॥१॥

रपि च ।

लासाद्बाहुदस्ते परिचलति गणेषूल्लसत्कौतुकेषु
क्रोडं मातुः कुमारे विशति विषमुचि प्रेक्षमाणे सरोषम् ।
दावष्टम्भसीदद्भुजपुषि दशमुखे याति पातालमूलं
क्रुद्धोऽप्याश्लिष्टमूर्तिर्भयघनमुमया पातु तुष्टः शिवो नः ॥२॥

(नान्द्यन्ते)

सूत्रधारः— (परिक्रम्य ।) अद्याहं वसन्तोत्सवे सबमानमाहूय नानादिग्देशादागतेन राज्ञः श्रीहर्षदेवस्य पापद्मोपजीविना राजसमूहेनोक्तः । यथास्मत्स्वामिना श्रीहर्षदेवेनापूर्ववस्तुरचनालंकृता प्रियदर्शिका नाम नाटिका तेत्यस्माभिः श्रोत्रपरंपरया श्रुतम् । न तु प्रयोगतो दृष्टा । त्तस्यैव राज्ञः सर्वजनहृदयाह्लादिनो बहुमानादस्मासु चाप्रहबुद्ध्या वा यथावत्प्रयोगेण त्वया नाटयितव्येति । तावन्नेपथ्यरचनां कृत्वा यथाभिलषितं संपादयामि । (पोऽवलोक्य ।) आवर्जितानि सामाजिकमनांसीति मे नियः । कुतः ।

Digitized by Google

श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी
लोके हारि च वत्सराजचरितं नाट्ये च दक्षा वयम् ।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-
र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः ॥३॥

(नेपथ्याभिमुखमवलोक्य ।) अये । कथं प्रस्तावनाभ्युद्यते मयि विदितास्मदभिप्रायोऽङ्गाधिपतेर्दृढवर्मणः कञ्चुकिनो भूमिकां कृत्वास्मद्गातेत एवाभिवर्तते । तद्यावदहमप्यनन्तरभूमिकां संपादयामि । (इति निष्क्रान्तः ।)

इति प्रस्तावना ।

॥ विष्कम्भकः ॥

(ततः प्रविशति कञ्चुकी ।)

कञ्चुकी— (सशोकश्रमं नाटयन् । निःश्वस्य ।) कष्टं भो कष्टम् ।

राज्ञो विपद्बन्धुवियोगदुःखं
देशच्युतिर्दुर्गममार्गखेदः ।
आस्वाद्यतेऽस्याः कटुनिष्फलायाः
फलं मयैतद्विरजीवितायाः ॥ ४ ॥

(सशोकं सविस्मयं च ।) तादृशस्यापि नामाप्रतिहतशक्तित्रयस्य रघुदिलीपनलतुल्यस्य देवस्य दृढवर्मणो मत्प्राभृतमानाप्यनेन स्वदुहिता वत्सराजस्य दत्तेति बद्धानुशयेन वत्सराजो बन्धनान्न निवर्तत इति च लब्धरन्ध्रेण सहसागत्य कलिङ्गहतकेन विपत्तिरीदृशी क्रियत इति यत्सत्यमुपपन्नमपि न श्रद्दधे । कथमेकान्तनिष्ठुरमीदृशं च दैवमस्मासु । येनापि राजपुत्री यथाकथंचिदेनां वत्सराजायोपनीय स्वामिनमनृणं करिष्यामीति मत्वा मया तादृशादपि प्रलयकात

Digitized by Google

दारुणादवस्कन्दसंभ्रमादपवाह्य देवस्य दृढवर्मणो मित्रभावान्वितस्यैवाटविकस्य नृपतेर्विन्ध्यकेतोर्गृहे स्थापिता सती स्नानाय नातिदूरमित्यगस्त्यतीर्थं गते मयि क्षणात्कैरपि निपत्य हृते विन्ध्यकेतौ रक्षोभिरिव निर्मानुषीकृते दग्धे स्थाने न ज्ञायते कस्यामवस्थायां वर्तत इति। निपुणं च विचितमेतन्मया सर्वं स्थानम् । न च ज्ञातं किं तैरेव दस्युभिर्नीताथवा दग्धेति । तत्किं करोमि मन्दभाग्यः । (विचिन्त्य ।) अये । एवं श्रुतं मया । बन्धनात्परिभ्रष्टः प्रद्योततनयामपहृत्य वत्सराजः कौशाम्बीमागत इति । किं तत्रैव गच्छामि । (निःश्वस्यात्मनोऽवस्थां पश्यन् ।) किमिव हि राजपुत्र्या विना तत्र गत्वा कथयिष्यामि । अये । कथितं चाद्य मम विन्ध्यकेतुना— "मा भैषीः । जीवति तत्रभवान्महाराजो दृढवर्मा गाढप्रहारजर्जरीकृतो बद्धस्तिष्ठति" इति । तदधुना स्वामिनमेव गत्वा पादपरिचर्यया जीवितशेषमात्मनः सफलयिष्यामि । (परिक्रम्योर्ध्वमवलोक्य ।) अहो । अतिदारुणता शरदातपस्य । यदेवमनेकदुःखसंतापितेनापि मया तीक्ष्णोऽवगम्यते ।

घनबन्धनमुक्तोऽयं कन्याग्रहणात्परां तुलां प्राप्य ।
रविरधिगतस्वधामा प्रतपति खलु वत्सराज इव ॥५॥

(इति निष्क्रान्तः ।)

इति विष्कम्भकः ।

॥ प्रथमोऽङ्कः ॥

(ततः प्रविशति राजा विदूषकश्च ।)

राजा—

भृत्यानामविकारिता परिगता दृष्टा मतिर्मन्त्रिणां
मित्राण्यप्युपलक्षितानि विदितः पौरानुरागोऽधिकम् ।

Digitized by Google

निर्व्यूढा रणसाहसव्यसनिता स्त्रीरत्नमासादितं
निर्व्याजादिव धर्मतः किमिव न प्राप्तं मया बन्धनात् ॥६॥

विदूषकः— (सरोषम्।) भो वअस्स। कहं तं एव्व दासीए उत्तं बन्धणहदअं पसंसेसि। तं दाणिं विसुमरेहि। जं तह णवग्गहो विअ गअवई खलखलाअमाणलोहसिङ्खलाबन्धपडिक्खलन्तचलणो सुण्णदुक्खरपिसुणिज्जन्तहिअअसंदावो रोसवसुत्तम्मिददिट्ठी गरुअकरफोडिअधरणिमग्गो रअणीसु वि अणिद्दासुहं अणुवाचेसि।

राजा— वसन्तक। दुर्जनः खल्वसि। पश्य।

दृष्टं चारकमन्धकारगहनं नो तन्मुखेन्दुद्युतिः
पीडा ते निगलस्वनेन मधुरास्तस्या गिरो न श्रुताः।
क्रूरा बन्धनरक्षिणोऽद्य मनसि स्निग्धाः कटाक्षा न ते
दोषान्पश्यसि बन्धनस्य न पुनः प्रद्योतपुत्र्या गुणान्॥७॥

विदूषकः—(सगर्वम्।) भो। जइ दाव बन्धणं सुहणिबन्धणं होइ। ता कीस तुमं दिढवम्मा बद्धोत्ति कलिङ्गरण्णो उवरि रोसं बन्धेसि।

राजा—(विहस्य।) धिङ्मूर्ख। न खलु सर्वो वत्सराजः। य एवं वासवदत्तामवाप्य बन्धनान्निर्यास्यति। तदास्तां तावदियं कथा। विन्ध्यकेतोरुपरि बहून्यहानि विजयसेनस्य प्रेषितस्य। न चाद्यापि तत्सकाशात्कश्चिदागतः।

---

१ भो वयस्य। कथं तमेव दास्याः पुत्रं बन्धनहृतकं प्रशंससि। तमिदानीं विस्मर। यत्तथा नवग्रह इव गजपतिः खलखलायमानलोहशृङ्खलाबन्धप्रतिस्खलच्चरणः शून्यदुष्करपिशुनयद्धृदय संतापो रोषवशोत्तम्भितदृष्टिर्गुरुकरस्फोटितधरणिमार्गो रजनीष्वप्यनिद्रासुखमनुवाचयसि।

२ भोः। यदि तावद्बन्धनं सुखनिबन्धनं भवति। तत्कस्मात्त्वं दृढवर्मा बद्ध इति कलिङ्गराजस्योपरि रोषं बध्नासि।

Digitized by Google

दाहूयता तावदमात्यो रुमण्वान् । तेन सह किंचिदालपि-
तुमिच्छामि ।

(प्रविश्य ।)

प्रतीहारी— जेदुं जेदु देव्वो । एसो क्खु विज-
असेणो अमच्चो रुमण्णो वि पडिहारभूमिं उवट्ठिओ । 5

राजा— त्वरितं प्रवेशय तौ ।

प्रतीहारी— जं[2] देवो आणवेदि । (इति निष्क्रान्ता ।)

(ततः प्रविशति रुमण्वान्विजयसेनश्च ।)

रुमण्वान्— (विचिन्त्य ।)

तत्क्षणमपि निष्क्रान्ताः कृतदोषा इव विनापि दोषेण । 10
प्रविशन्ति शङ्कमाना राजकुलं प्रायशो भृत्याः ॥ ८ ॥

(उपसृत्य ।) जयतु देवः ।

राजा—(आसनं निर्दिश्य) रुमण्वन् । इत आस्यताम् ।

रुमण्वान्—(सस्मितमुपविश्य ।) एष खलु जितविन्ध्य-
केतुर्विजयसेनः प्रणमति । 15

(विजयसेनस्तथा करोति ।)

राजा— (सादरं परिष्वज्य ।) अपि कुशली भवान् ।

विजयसेनः— अद्य स्वामिनः प्रसादात् ।

राजा— विजयसेन । स्थीयताम् ।

(विजयसेन उपविशति ।) 20

राजा—विजयसेन । कथय विन्ध्यकेतोर्वृत्तान्तम् ।

विजयसेनः— देव । किमपरं कथयामि । यादृशः
स्वामिनि कुपिते ।

राजा—तथापि विस्तरतः श्रोतुमिच्छामि ।

---

१ जयतु जयतु देवः । एष खलु विजयसेनोऽमात्यो रुमण्वानपि प्र-
तीहारभूमिमुपस्थितौ ।

२ यदेव आज्ञापयति ।

Digitized by Google

विजयसेनः—देव । श्रूयताम् । इतो वयं देवपादा
देशाद्यथादिष्टेन करितुरगपदातिसैन्येन महान्तमप्यध्वान
दिवसत्रयेणोल्लङ्घ्य प्रभातवेलायामतर्किता एव विन्ध्यकेतो
रुपरि निपतिताः स्मः ।

राजा— ततस्ततः ।

विजयसेनः— ततः सोऽप्यस्मद्बलतुमुलकलकलाक
र्णनेन प्रतिबुद्धः केसरीव विन्ध्यकन्दरान्निर्गत्य विन्ध्यकेतु
रनवेक्षितबलवाहनो यथासंनिहितकतिपयसहायः सहस
स्वनामोद्घोषयन्नस्मानभियोद्धुं प्रवृत्तः ।

राजा—(रुमण्वन्तमवलोक्य सस्मितम् ।) शोभितं विन्ध्य
केतुना । ततस्ततः ।

विजयसेनः—ततोऽस्माभिरयमसाविति द्विगुणतर
बद्धमत्सरोत्साहैर्महता विमर्देन निःशेषितसहाय एक एव
विमर्दिताधिकबलक्रोधवेगो दारुणतरं संप्रहारमकरोत् ।

राजा— साधु विन्ध्यकेतो । साधु साधु ।

विजयसेनः—किं वा वर्ण्यते देव । संक्षेपतो विज्ञा
पयामि ।

पादातं पत्तिरेव प्रथमतरमुरःपेषमात्रेण पिष्ट्वा
दूरान्नीत्वा शरौघैर्हरिणकुलमिव त्रस्तमश्वीयमाशाः ।
सर्वत्रोत्सृष्टसर्वप्रहरणनिवहस्तूर्णमुत्खाय खड्गं
पश्चात्कर्तुं प्रवृत्तः करिकरकदलीकाननच्छेदलीलाम्॥९

एवं बलत्रितयमाकुलमेक एव
कुर्वन्कृपाणकिरणच्छुरितांसकूटः ।
शस्त्रप्रहारशतझर्झरितोरुवक्षाः
श्रान्तश्चिराद्विनिहतो युधि विन्ध्यकेतुः ॥१०

Digitized by Google

राजा—रुमण्वन् । सत्पुरुषोचितं मार्गमनुगच्छतो
ः सत्यं व्रीडिता एव वयं विन्ध्यकेतोर्मरणेन ।

रुमण्वान्—देव । त्वद्विधानामेवं गुणैकपक्षपातिनां
पोरपि गुणाः प्रीतिं जनयन्ति ।

राजा— विजयसेन । अप्यस्ति विन्ध्यकेतोरपत्यं
त्रास्य परितोषस्य फलं दर्शयामि ।

विजयसेनः—देव । इदमपि विज्ञापयामि । एवं सब-
धुपरिवारे हते विन्ध्यकेतौ तमनुसृतासु सहधर्मचारिणीषु
न्ध्यशिखराश्रितेषु जनपदेषु शून्यभूते तत्स्थाने "हा तात
। तात" इति कृतकृपणप्रलापा विन्ध्यकेतोर्वेश्मन्या-
राजात्यानुरूपा कन्यका तद्दुहितेत्यस्माभिरानीता द्वारि ति-
ति । तां प्रति देवः प्रमाणम् ।

राजा—यशोधरे । गच्छ गच्छ । त्वमेव वासवदत्तायाः
मर्पय । वक्तव्या च देवी । भगिनीबुद्ध्या त्वयैव सर्वदा
ष्टव्या । गीतनृत्तवाद्यादिषु विशिष्टकन्यकोचितं सर्वं शि-
ायितव्या । यदा वरयोग्या भविष्यति तदा मां स्मारयेति ।

प्रतीहारी—जं देवो आणवेदि । (इति निष्क्रान्ता ।)

(नेपथ्ये वैतालिकः ।)

लीलामज्जनमङ्गलोपकरणम्नानीयसंपादिनः
सर्वान्तःपुरवारविभ्रमवतीलोकस्य ते संप्रति ।
आयासस्खलदंशुकाव्यवहितच्छायावदातैः स्तनै-
रुत्क्षिप्तापरशातकुम्भकलशैर्वालंकृता स्नानभूः॥११॥

राजा—(ऊर्ध्वमवलोक्य ।) अये । कथं नभोमध्यमध्या-
। भगवान्सहस्रदीधितिः । संप्रति हि ।

---

१ यदेव आज्ञापयति ।

Digitized by Google

आघ्रात्यर्काशुतापक्वथदिव शफरोद्वर्तनैर्दीर्घिकाम्भः
छत्राभं नृत्तलीलाशिथिलमपि शिखी बर्हभारं तनोति
छायाचक्रं तरूणां हरिणशिशुरुपैत्यालवालाम्बुलुब्धः
सद्यस्त्यक्त्वा कपोलं विशति मधुकरः कर्णपालीं गजस्य।१

रुमण्वन्। उत्तिष्ठोत्तिष्ठ। प्रविश्याभ्यन्तरमेव कृतयथो
तक्रियाः सत्कृत्य विजयसेनं कलिङ्गोच्छित्तये प्रेषयाम

(इति निष्क्रान्ताः सर्वे।)

इति प्रथमोऽङ्कः।

॥ द्वितीयोऽङ्कः ॥

(ततः प्रविशति विदूषकः।)

विदूषकः—[1]णं भणिदोह्मि इन्दीवरिआए जह अ
उववासणिअमट्ठिआ देवी वासवदत्ता सोत्थिवाअणणिमि
सद्दावेदित्ति। ता जाव धाराघरुज्जाणदिग्घिआए ण्हाइअ
वीपासं गदुअ कुक्कुटवादं करिस्सं। अण्णहा कहं अह्म
सरिसा बह्मणा राअकुले पडिग्गहं करेन्ति। (नेपथ्याभिमुख
वलोक्य।) कहं एसो पिअवअस्सो अज्ज देवीए विरहुक्कण्ठा
णोदणणिमित्तं धाराघरुज्जाणं एव्व पत्थिदो। ता जाव
अस्सेण सह एव्व गदुअ जहोदिदं अणुचिट्ठिस्सं।

---

१ ननु भणितोऽस्मीन्दीवरिकया यथार्यं उपवासनियमि
देवी वासवदत्ता स्वस्तिवायननिमित्तं शब्दापयेदिति। तद्यावद्धारागृह
नदीर्घिकायां स्नात्वा देवीपार्श्वं गत्वा कुक्कुटवादं करिष्यामि। अन्यथा
थमस्माभिः सदृशा ब्राह्मणा राजकुले प्रतिग्रहं कुर्वन्ति। कथमेष प्रियवय
ऽद्य देव्या विरहोत्कण्ठाविनोदननिमित्तं धारागृहोद्यानमेव प्रस्थितः
द्यावद्वयस्येन सहैव गत्वा यथोदितमनुस्थास्यामि।

Digitized by Google

(ततः प्रविशति सोत्कण्ठो राजा ।)

राजा--

मां मङ्गलमात्रमण्डनभृतं मन्दोद्यमालापिनी-
मापाण्डुच्छविना मुखेन विजितप्रातस्तनेन्दुद्युतिम् ।
त्कण्ठां नियमोपवासविधिना चेतो ममोत्कण्ठते
तां द्रष्टुं प्रथमानुरागजनितावस्थामिवाद्य प्रियाम् ॥१॥

विदूषकः---(उपसृत्य ।) [1]सोत्थि होदे । वड्ढदु भवं ।

राजा---(विलोक्य ।) वसन्तक । कस्मात्प्रहृष्ट इव लसे ।

विदूषकः--- [2]अच्चदि खु देवी बम्हणं ।

राजा--- यद्येवं ततः किम् ।

विदूषकः---(सगर्वम् ।) [3]भो । ईरिसो क्खु बम्हणो । चउव्वेदपच्चवेदछट्ठवेदबम्हणसहस्सपज्जाउले राअउले मं अहं एव्व देवीसआसादो सोत्थिवाअणं लहेमि ।

राजा--- (विहस्य ।) वेदसंख्ययैवावेदितं ब्राह्मण्यम् । गच्छ महाब्राह्मण । धारागृहोद्यानमेव गच्छावः ।

विदूषकः--- [4]जं देवो आणवेदि ।

राजा--- गच्छाग्रतः ।

विदूषकः---[5]भो । एहि गच्छम्ह । (परिक्रम्यावलोक्य च ।)

---

१ स्वस्ति भवते । वर्धतां भवान् ।

२ अर्चति खलु देवी ब्राह्मणम् ।

३ भोः । ईदृशः खलु ब्राह्मणः । यश्चतुर्वेदपञ्चवेदषड्वेदब्राह्मणसहस्रपर्याकुले कुले प्रथममहमेव देवीसकाशात्स्वस्तिवाचनं लभे ।

४ यदेव आज्ञापयति ।

५ भोः । एहि गच्छावः । भो वयस्य । पश्य पश्य । अविरतपतद्विविधकुसुमभारशिलातलोत्सङ्गस्य परिमलनिलीनमधुकरभरभग्नवकुलनालतोलतास्य कमलगन्धमहणोद्दाममारुतपर्यवरुद्धबन्धूकबन्धनस्याविरलतमापिहितातपप्रकाशस्यास्य धारागृहोद्यानस्य सभ्राकताम् ।

Digitized by Google

वअस्स। पेक्ख पेक्ख । अविरदपडन्तविविहकुसुमसु
मालसिलाअलुच्छङ्गस्स परिमलणिलीणमहुअरभरभग्गव
लमालदीलदाजालअस्स कमलगन्धगहणुद्दाममारुदपर्जव
द्धबन्धूअबन्धणस्स अविरलतमालतरुपिहिदातपप्पआस
अस्स धाराघरुज्जाणस्स सस्सरीअअं ।

राजा— वयस्य । साध्वभिहितम् । अत्र हि ।

वृन्तैः क्षुद्रप्रवालस्थगितमिव तलं भाति शेफालिकानां
गन्धः सप्तच्छदानां सपदि गजमदामोदमोहं करोति
एते चोन्निद्रपद्मच्युतबहलरजःपुञ्जपिञ्जाङ्गरागा
गायन्त्यव्यक्तवाचः किमपि मधुलिहो वारुणीपानमत्ताः

विदूषकः—[1]भो वअस्स। एदं पि दाव पेक्ख पेक्ख
जो एसो अविरलपडन्तकुसुमणिअरो अज्ज वि पत्तन्तरग
न्तवरिसावसाणसलिलबिन्दू विअ लक्खीअदि सत्तवण
पाअवो ।

राजा—वयस्य। सम्यगुत्प्रेक्षितम् ।बहेव सदृशं
लदसमयस्य । तथाहि ।

बिभ्राणा मृदुतां शिरीषकुसुमश्रीहारिभिः शाद्वलैः
सद्यः कल्पितकुट्टिमा मरकतक्षोदैरिव क्षालितैः ।
एषा संप्रति बन्धनाद्विगलितैर्बन्धूकपुष्पोत्करै-
रद्यापि क्षितिरिन्द्रगोपकशतैश्छन्नेव संलक्ष्यते ॥ २॥

(ततः प्रविशति चेटी ।)

चेटी—[2]आणत्तम्हि देवीए वासवदत्ताए । हञ्जे इन्दीवरि
ए । अज्ज मए अगत्थिमहेसिणो अघो दादव्वो । ता ग

---

१ भो वयस्य । इदमपि तावत्पश्य पश्य । य एषोऽविरलपतत्कुसुम
निकरोऽद्यापि पत्रान्तरगलद्बर्षावसानसलिलबिन्दुरिव लक्ष्यते सप्तपर्णपादपः

२ आज्ञप्तास्मि देव्या वासवदत्तया । हञ्जे इन्दीवरिके । अद्य मयाग
स्त्यमहर्षयेऽर्घो दातव्यः। तद्गच्छ त्वम् । शेफालिकाकुसुममालां लघु गृही

Digitized by Google

र तुमं । सेहालिआकुसुममालं लहु गेण्हिअ आअच्छेत्ति । ावि आरण्णिआ धाराघरुज्जाणदीहिआए जाव एव्व असिआइं कमलाइं ण अत्थाहिलासिणा सुज्जेण मउला-ज्जन्ति ताव एव्व लहुअं अवचिणुअ आअच्छदुत्ति । एसा ास्सिणी तं दीहिअं ण जाणादि । ता गेण्हिअ तं गमि- 5 इ । (नेपथ्याभिमुखमवलोक्य।) इदो इदो आरण्णिए एहि ।

(ततः प्रविशत्यारण्यका ।)

आरण्यका—(सबाष्पोद्वेगमात्मगतम्।) तंह[1] णाम तारिसे वंसे प्पण्णाए अण्णजणं आण्णाविअ ट्ठिदाए संपदं परस्स मए ाणत्ती कादव्वेत्ति । णत्थि क्खु दुक्खरं देव्वस्स । अहवा 10 ह एव्व एसो दोसो । जेण जाणन्तीए वि ण वावादिओ प्पा। ता किं संपदं करिस्सं। अहवा दुक्खरं दाणिं मए चि-न्तदं । वरं एव्व एदं वि। ण उण अप्पणो महग्घं वंसं प-ासअन्तीए मए लहुईकिदो अप्पा । ता का गई। जहम-गदं अणुचिट्ठिस्सं । 15

चेटी—इदो[2] एहि आरण्णिए ।

ागच्छेति । एषाप्यारण्यका धारागृहोद्यानदीर्घिकाया यावदेव विक-सितानि कमलानि नास्ताभिलाषिणा सूर्येण मुकुलाय्यन्ते तावदेव लघ्वव-चित्यागच्छत्विति । एषा तपस्विनी तां दीर्घिकां न जानाति । तद्गृही-त्वा तां गमिष्यामि । इत इत आरण्यके एहि ।

१ तथा नाम तादृशे वंश उत्पन्नयान्यजनमाज्ञाप्य स्थितया सांप्रतं ारस्य मयाज्ञप्तिः कर्तव्येति । नास्ति खलु दुष्करं दैवस्य । अथवा ममैवै-ा दोषः । येन जानत्यापि न व्यापादित आत्मा। तत्किं सांप्रतं करिष्या-मि । अथवा दुष्करमिदानीं मया चिन्तितं । वरमेवैतदपि । न पुनरात्मनो ाहार्घे वंशं प्रकाशयन्त्या मया लघूकृत आत्मा । तत्का गतिः । यथाभणि-तमनुस्थास्यामि ।

२ इत एह्यारण्यके ।

Digitized by Google

आरण्यका—इअं आअच्छामि । (श्रमं नाटयन्ती।) [1] दूरे किं अज्जवि दिग्घिआ ।

चेटी— एसा सेहालिआगुम्मन्तरिआ । ता एहि ओदरह्म । (अवतरणं नाटयतः ।)

राजा—वयस्य ।किमन्यदिव चिन्तयसि । ननु अवीचि बहेव सदृशं जलदसमयस्य । (इति बिभ्राणा मृदुतामित्यादि पठति ।)

विदूषकः—(सक्रोधम् ।) भो ।तुमं दाव एदं अण्णं अक्खन्तो उक्कण्ठाणिब्भरं विणोदेसि अप्पाणं । मम उण बम्ह णस्स सोत्थिवाअणवेला अदिक्कमदि । ता जाव अहं तु रिअं दीहिआए ण्हाइअ देवीए सआसं गमिस्सं ।

राजा— ननु मूर्ख । पारंगता एव वयं दीर्घिकायाः । एवमनेकेन्द्रियसुखातिशयमनुभवन्नपि नोपलक्षयसि पश्य ।

श्रोत्रं हंसस्वनोऽयं सुखयति दयितानूपुरह्लादकारी
दृष्टिप्रीतिं विधत्ते तटतरुविवरालक्षिता सौधपाली ।
गन्धेनाम्भोरुहाणां परिमलपटुना जायते घ्राणसौख्यं
गात्राणां ह्लादमेते विदधति मरुतो वारिसंपर्कशीताः ॥

तदेहि । दीर्घिकातटमुपसर्पावः । (परिक्रम्यावलोक्य च ।) [2] वयस्य । पश्य पश्य ।

उद्यानदेवतायाः स्फुटपङ्कजकान्तिहारिणी स्वच्छा ।
दृष्टिरिव दीर्घिकेयं रमयति मां दर्शनेनैव ॥५॥

---

१ इयमागच्छामि । हञ्जे । दूरे किमद्यापि दीर्घिका ।

२ एषा शेफालिकागुल्मान्तरिता । तदेहि । अवतरावः ।

३ भोः । त्वं तावदेतदन्यच्च पश्यन्नुत्कण्ठानिर्भरं विनोदयस्यात्मानं मम पुनर्ब्राह्मणस्य स्वस्तिवायनवेलातिक्रामति । तद्यावदहं त्वरितं दीर्घिकायां स्नात्वा देव्याः सकाशं गमिष्यामि ।

Digitized by Google

विदूषकः— (सकौतुकम् ।) भो[1] वअस्स । पेक्ख पेक्ख । का एसा कुसुमपरिमलसुअन्धवेणीमहुअरावली विद्रुमलआरुणहत्थपल्लवा उज्जुलुन्ततणुकोमलबाहुलदा सच्चं चक्खचरी विअ उज्जाणदेवदा इत्थिआ दीसइ ।

राजा—(सकौतुकं विलोक्य ।) वयस्य । निरतिशयस्वरूपशोभाजनितबहुविकल्पेयम् । यत्सत्यमहमपि नावगच्छामि । पश्य ।

तालाद्भुतनावलोकनपरा किं नागकन्योत्थिता
मिथ्या तत्खलु दृष्टमेव हि मया तस्मिन्कुतोऽस्तीदृशी ।
मूर्ता स्यादिह कौमुदी न घटते तस्या दिवा दर्शनं
केयं हस्ततलस्थितेन कमलेनालोक्यते श्रीरिव ॥ ६ ॥

विदूषकः— (निरूप्य ।) ऐसा क्खु देवीए परिचारिआ इन्दीवरिआ । ता गुम्मन्तरिआ भविअ पेक्खह्म ।

(उभौ तथा कुरुतः ।)

चेटी—(कमलिनीपत्रग्रहणं नाटयन्ती ।) अरण्णिए[3] । अहिणु तुमं पदुमाइं । अहं वि एदस्सिं णलिनीपत्तम्मि सेहालिआकुसुमाइं अवइणुअ देवीसआसं गमिस्सं ।

राजा— वयस्य । संलाप इव वर्तते । तदवहिताः शृणुमः । कदाचिदित एव व्यक्तीभविष्यति ।

(चेटी गमनं नाटयति ।)

आरण्यका— हला[4] इन्दीवरिए । ण सक्कुणोमि तुए

---

१ भो वयस्य । पश्य पश्य । कैषा कुसुमपरिमलसुगन्धवेणिमधुकरावलेर्विद्रुमलतारुणहस्तपल्लवोन्नवलत्ततनुकोमलबाहुलता सत्यं प्रत्यक्षचरी उद्यानदेवता स्त्री दृश्यते ।

२ एषा खलु देव्याः परिचारिकेन्दीवरिका । तद्गुल्मान्तरितौ भूत्वा पश्यावः ।

३ आरण्यके । अवचिनु त्वं पद्मानि । अहमप्येतस्मिन्नलिनीपत्रे शेफालिकाकुसुमान्यवचित्य देवीसकाशं गमिष्यामि ।

४ हला इन्दीवरिके । न शक्नोमि त्वया विनात्रासितुम् ।

Digitized by Google

विणा एत्थ आसिदुं ।

चेटी— (विहस्य ।) जादिसं अज्ज मए देवीए मन्ति[1] दं सुदं तारिसेण चिरं एव्व मए विणा तुए आसिदव्वं

आरण्यका— (सविषादम् ।) किं[2] देवीए मन्तिदं

चेटी— एदं[3] । तदा एसा अहं महाराएण भणिद जह जदा एसा विन्झकेदुदुहिदा वरजोग्गा भविस्सदि त दा अहं सुमराइदव्वोत्ति । ता संपदं महाराअं सुमरावेमि जेण से वरचिन्तापज्जाउलो भविस्सदि ।

राजा—(सहर्षम् ।) इयं सा विन्ध्यकेतोर्दुहिता । (सानुतापम् ।) चिरं मुषिताः स्मो वयम् । वयस्य । निर्दोषदर्शना कन्यका खल्वियम् । विश्रब्धमिदानीं पश्यामः ।

आरण्यका— (सरोषं कर्णौ पिधाय ।) तं[4] गच्छ तुमं ण तुए असंबद्धप्पलाविणीए पओअणं ।

(चेट्यपसृत्य पुष्पावचयं नाटयति ।)

राजा— अहो । सुतरां प्रकटीकृतमाभिजात्यं धीरतया । वयस्य । धन्यः खल्वसौ य एतदङ्गस्पर्शसुखभाजनं भविष्यति ।

(आरण्यका कमलावचयं नाटयति ।)

विदूषकः— भो[5] वअस्स । पेक्ख पेक्ख । अच्चरिअं अच्चरिअं । एसा सलिलचलन्तकरपल्लवप्पहाविच्छिदेण ओ

---

१ यादृशमत्र मया देव्या मन्त्रितं श्रुतं तादृशेन चिरमेव मया विना त्वयासितव्यम् ।

२ किं देव्या मन्त्रितम् ।

३ एतत् । तदैषाहं महाराजेन भणिता यथा यदैषा विन्ध्यकेतुदुहिता वरयोग्या भविष्यति तदाहं स्मारयितव्य इति । तत्सांप्रतं महाराजं स्मारयामि येनास्या वरचिन्तापर्याकुलो भविष्यति ।

४ तद्गच्छ त्वम् । न त्वयासंबद्धप्रलापिन्या प्रयोजनम् ।

५ भो वयस्य । पश्य पश्य । आश्चर्यमाश्चर्यम् । एषा सलिलचलत्करपल्लवप्रभाविस्तृतेनापहसितशोभं करोति कमलवनमवचिन्वंती ।

Digitized by Google

सिअसोहं करेदि कमलवणं अवचिणन्ती।

राजा— वयस्य। सत्यमेवैतत्। पश्य।

नच्छिन्नामृतबिन्दुवृष्टिसदृशीं प्रीतिं ददत्या दृशां
यातायां विगलत्पयोधरपटाद्रूष्टव्यतां कामपि।
तस्याश्चन्द्रमसस्तनोरिव करस्पर्शास्पदत्वं गता
नैते यन्मुकुलीभवन्ति सहसा पद्मास्तदेवाद्भुतम् ॥७॥

आरण्यका— (भ्रमरसंबाधं नाटयन्ती।) हद्धि हद्धि। एदे क्खु अवरे परिच्चइअ कमलिणीं णीलुप्पलवणाइं समापडन्ता णिउणअरं बाधन्ता आआसअन्ति मं दुट्ठमहुअरा। (उत्तरीयेण मुखं पिधाय सभयम्।) हला इन्दीवरिए। परित्तायहि मं परित्तायहि मं। एदे दुट्ठमहुअरा परिभविस्सन्ति।

विदूषकः—भो[2] वअस्स। पुण्णा दे मणोरहा। जाव एव्व गब्भदासीए सुदा ण आअच्छदि दाव एव्व तुमं विअ तुण्हीको भविअ उवसप्प। एसा वि सलिलसद्दसुणिदेण तदसंचारेण इन्दीवरिआ आअच्छदित्ति जाणिअ तुमं एव्व पोलम्बिस्सदि।

राजा— साधु वयस्य साधु। कालानुरूपमुपदिष्टम्। (इत्यारण्यकासमीपमुपसर्पति।)

आरण्यका—(पदशब्दाकर्णनं नाटयन्ती।) इन्दीवरिए। लहु उवसप्प लहु उवसप्प। आउलीकिदम्हि दुट्ठमहुअरेहिं। (राजानमवलम्बते।)

---

१ हा धिक् हा धिक्। एते खल्वपरे परित्यज्य कमलिनीं नीलोत्पलवनानि समापतन्तो निपुणतरं बाधमाना आयासयन्ति मां दुष्टमधुकराः। हञ्जे इन्दीवरिके। परित्रायस्व मां परित्रायस्व माम्। एते दुष्टमधुकराः परिभविष्यन्ति।

२ भो वयस्य। पूर्णास्ते मनोरथाः। यावदेव गर्भदास्याः सुता नागच्छति तावदेव त्वमपि तूष्णीको भूत्वोपसर्प। एषापि सलिलशब्दश्रुतेन तदसंचारेणेन्दीवरिकागच्छतीति ज्ञात्वा त्वामेवावलम्बिष्यते।

३ इन्दीवरिके। लघूपसर्प लघूपसर्प। आकुलीकृतास्मि दुष्टमधुकरैः।

Digitized by Google

(राजा कण्ठे गृह्णाति । आरण्यकोत्तरीयं मुखादपनीय राजानमपश्यन्ती भ्रमरावलोकनं नाटयति ।)

राजा— (स्वोत्तरीयेण भ्रमरानिवारयन् ।)

अयि विसृज विषादं भीरु भृङ्गास्तवैते
परिमलरसलुब्धा वक्त्रपद्मे पतन्ति ।
विकिरसि यदि भूयस्त्रासलोलायताक्षी
कुवलयवनलक्ष्मीं तत्कुतस्त्वां त्यजन्ति ॥ ८ ॥

आरण्यका— (राजानं दृष्ट्वा साध्वसं नाटयन्ती ।) [1]को ण एसा इन्दीवरिआ । (सभयं राजानं त्यक्त्वापसरन्ती ।) इन्दी वरिए । लहु आअच्छ लहु आअच्छ । परित्ताएहि मं ।

विदूषकः— [2]होदि । सअलपुढवीपरित्ताणसमत्थेण वच्छराएण परित्ताअन्ती चेडिं इन्दीवरिअं अक्कन्दसि ।

(राजा "अयि विसृज–" इत्यादि पुनः पठति ।)

आरण्यका—(राजानमवलोक्य सस्पृहं सलज्जं चात्मगतम् ।) [3]अअं क्खु सो महाराओ जस्स अहं तादेण दिण्णा । ठाणे क्खु तादस्स पक्खवादो । (आकुलतां नाटयति ।)

चेटी— [4]आआसिआ क्खु आरण्णिआ दुट्ठमहुअरीहिं ता जाव उवसप्पिअ समस्सासेमि । आरण्णिए । मा भाअहि । एसा उवअदम्हि ।

---

१ कथं नैषेन्दीवरिका । इन्दीवरिके । लघ्वागच्छ लघ्वागच्छ परित्रायस्व माम् ।

२ भवति । सकलपृथ्वीपरित्राणसमर्थेन वत्सराजेन परित्रायमाणा टीमिन्दीवरिकामाक्रन्दसि ।

३ अयं खलु स महाराजो यस्याहं तातेन दत्ता । स्थाने खलु तात पक्षपातः ।

४ आयासिता खल्वारण्यका दुष्टमधुकरैः । तद्यावदुपसर्प्य समाश्वासयामि । आरण्यके । मा विभिहि । एषोपगतास्मि ।

Digitized by Google

विदूषकः—भो[1]। ओसर ओसर । एसा क्खु इन्दी-रिआ आअदा । ता एदं उत्तन्तं पेक्खिअ देवीए णिवेदइ-स्सदि । (अङ्गुल्या निर्दिश्य ।) ता इमं एव्व कदलीघरं पवि-सिअ मुहुत्तं चिट्ठ्ह ।

(उभौ तथा कुरुतः ।)

चेटी—(उपसृत्य कपोलौ स्पृशन्ती ।) हञ्जे[2] आरण्णिए । मलसरिसस्स तुह वअणस्स अअं दोसो जं महुअरा इअं अवरज्झन्ति । (हस्ते गृहीत्वा ।) ता एहि गच्छह्म । रिणदो दिअहो ।

(गमनं नाटयतः ।)

आरण्यका— (कदलीगृहाभिमुखमवलोक्य ।) हञ्जे[3] न्दीवरिए । अदिसिसिरदाए सलिलस्स ऊरुत्थम्भो विअ मुप्पण्णो । ता सणिअं सणिअं गच्छह्म ।

चेटी— तँह[4] ।

(इति निष्क्रान्ते ।)

विदूषकः—भो[5]। एहि णिक्कमह्म । तं गेण्हिअ एसा सीए सुदा इन्दीवरिआ गदा ।

(तथा कुरुतः ।)

राजा— (निःश्वस्य ।) कथं गता । सखे वसन्तक । खल्वविघ्नमभिलषितमधन्यैः प्राप्यते । (विलोक्य ।) सखे प-र पश्य ।

---

१ भोः । अपसरापसर । एषा खल्विन्दीवरिकागता । तदेतं वृत्तान्तं य देव्यै निवेदयिष्यति । तदिदमेव कदलीगृहं प्रविश्य मुहूर्तं तिष्ठावः ।

२ हञ्जे आरण्यके । कमलसदृशस्य तव वदनस्यायं दोषो यन्मधुकरा मपराध्यन्ति । तदेहि गच्छावः । परिणतो दिवसः ।

३ हञ्जे इन्दीवरिके । अतिशिशिरतया सलिलस्योरुस्तम्भ इव समुत्प-न्नः । तच्छनैः शनैर्गच्छावः ।

४ तथा ।

५ भोः । एहि निष्क्रामावः । तां गृहीत्वैषा दास्याः सुतेन्दीवरिका गता ।

Digitized by Google

आबद्धमुखमपीदं कण्टकितं कमलकाननं तस्याः ।
सुकुमारपाणिपल्लवसंस्पर्शसुखं कथयतीव ॥९॥

(निःश्वस्य ।) सखे । क इदानीमुपायः पुनस्तां द्रष्टुम् ।

विदूषकः— भो[1] । तुमं एव्व पुत्तलिअं भञ्जिअ दाणिं रोदिसि । ण मे मुक्खस्स बह्मणस्स वअणं करेसि ।

राजा— किं मया न कृतम् ।

विदूषकः— तं[2] दाणिं विसुमरिदं । जह तुण्हीको भविअ उवसप्पेत्ति मए भणिदं । अदिसंकडे जं भवं पविसिअ अलिअपंडिच्चदुव्विदद्धदाए अइ विसिज विसादेत्ति एदेहिं अण्णेहिं अ कडुअवअणेहिं णिब्भच्छिअ संपदं किं रोदिसि । पुणो वि उवाअं पुच्छसि ।

राजा— कथं समाश्वासनमपि निर्भर्त्सितमिति भणितं मूर्खेण ।

विदूषकः— जाणिदं[3] एव्व को एत्थ मुक्खोत्ति । ता किं एदेण । अत्थमआहिलासी भअवं सहस्सरस्सी । ता एहि अब्भन्तर एव्व पविसह्म ।

राजा— (विलोक्य ।) अये । परिणतप्रायो दिवसः । अहह । संप्रति हि—

---

१ भोः । त्वमेव पुत्तलिकां भङ्क्त्वेदानीं रोदिषि । न मे मूर्खस्य ब्राह्मणस्य वचनं करोषि ।

२ तदिदानीं विस्मृतम् । यथा तूष्णीको भूत्वोपसर्पेति मया भणितम् । अतिसंकटे यद्भवान्प्रविश्यालीकपाण्डित्यदुर्विदग्धतया "अयि विसृजविषादम्" इत्येतैरन्यैश्च कटुवचनैर्निर्भर्त्स्य सांप्रतं किं रोदिषि । पुनरप्युपायं पृच्छसि ।

३ ज्ञातमेव कोऽत्र मूर्ख इति । तत्किमेतेन । अस्तमयाभिलाषी भगवान्सहस्ररश्मिः । तदेह्यभ्यन्तरमेव प्रविशावः ।

Digitized by Google

त्वा पद्मवनद्युतिं प्रियतमेवेयं दिनश्रीर्गता
रागोऽस्मिन्मम चेतसीव सवितुर्बिम्बेऽधिकं लक्ष्यते ।
क्राह्वोऽहमिव स्थितः सहचरीं ध्यायन्नलिन्यास्तटे
संजाताः सहसा ममेव भुवनस्याप्यन्धकारा दिशः॥१०॥

(इति निष्क्रान्ताः सर्वे ।)

इति द्वितीयोऽङ्कः ।

॥ तृतीयोऽङ्कः ॥

(ततः प्रविशति मनोरमा ।)

मनोरमा— आणत्तह्मि देवीए वासवदत्ताए हञ्जे णोरमे जं तं संगिच्चायणीए अज्जउत्तस्स मम अ उत्तन्तं ाडओवणिबद्धं तस्स णच्चिदव्वसेसं अज्ज तुह्मेहिं कोम- ीमहूसवे णच्चिदव्वंति । हिओ क्खु आरण्णिआए पिअ- ाहीए सुण्णहिअआए अण्णहा एव्व णच्चिदं । अज्ज उण ासवदत्ताभूमिआए ताए जइ तह करीअदि तदो अवस्सं वी कुप्पदि । ता कहिं दाव पेक्खिअ उवालम्भिस्सं । (वि- ाक्य ।) एसा आरण्णिआ अप्पणा एव्व किं वि किं वि मन्त- ान्ती दिग्घिआतीले कदलीघरअं पविसदि । ता गुम्मन्त- रिआ भविअ सुणिस्सं दाव से विसद्धजप्पिदाणि ।

---

१ आज्ञप्तास्मि देव्या वासवदत्तया हञ्जे मनोरमे यः स साङ्कृत्याय- ार्यपुत्रस्य मम च वृत्तान्तो नाटकोपनिबद्धस्तस्य नर्तितव्यशेषमद्य यु- ाभिः कौमुदीमहोत्सवे नर्तितव्यमिति । ह्यः खल्वारण्यकया प्रियसख्या यहृदययान्यथैव नर्तितम् । अद्य पुनर्वासवदत्ताभूमिकया तया यदि ा क्रियते ततोऽवश्यं देवी कुप्यति । तत्कुत्र तावत्प्रेक्ष्योपालप्स्ये । ए- रण्यकात्मनैव किमपि किमपि मन्त्रयमाणा दीर्घिकातीरे कदलीगृहं वेशति । तद्गुल्मान्तरिता भूत्वा श्रोष्यामि तावदस्या विश्रब्धजल्पितानि ।

Digitized by Google

(ततः प्रविशत्यासनस्था कामावस्थां नाटयन्त्यारण्यका।)

आरण्यका—(निःश्वस्य।) हिअअ[1] दुल्लहजणं पत्थअन्तो तुमं कीस मं दुक्खिदं करेसि।

मनोरमा— तं[2] एदं सुण्णहिअअत्तणस्स कारणं। किं उण एसा पत्थेदि। अवहिदा दाव सुणिस्सं।

आरण्यका— (साक्षम्।) कहं तह णाम सोहणदंसणो भविअ महाराओ एव्वं संदावेदि मं। अच्चरिअं अच्चरिअं। (निःश्वस्य।) अहवा मह एव्व एसा अभाअहेअदा। ण उण महाराअस्स दोसो।

मनोरमा— (सबाष्पम्।) कहं महाराओ एव्व से पत्थणिज्जो। साहु पिअसही साहु पिअसही। अभिजाअसरिसो दे अहिलासो।

आरण्यका— कस्स[3] दाव एदं उत्तन्तं णिवेदिअ सज्झवेअणं विअ दुक्खं कारइस्सं। (विचिन्त्य।) अहवा अत्थि मे हिअअणिव्विसेसा पिअसही मणोरमा। ताए वि एदं लज्जाए ण पारेमि कहिदुं। सव्वहा मरणं वज्जिअ कुदो मे हिअअस्स अण्णा णिव्वुदी।

---

१ हृदय। दुर्लभजनं प्रार्थयमानं त्वं कस्मान्मां दुःखितां करोषि।

२ तदेतच्छून्यहृदयत्वस्य कारणम्। किं पुनरेषा प्रार्थयते। अवहिता तावच्छ्रोष्यामि।

३ कथं तथा नाम शोभनदर्शनो भूत्वा महाराज एवं संतापयति माम्। आश्चर्यमाश्चर्यम्। अथवा ममैवैषाभागधेयता। न पुनर्महाराजस्य दोषः।

४ कथं महाराज एवास्याः प्रार्थनीयः। साधु प्रियसखि साधु प्रियसखि। आभिजात्यसदृशस्तेऽभिलाषः।

५ कस्मै तावदेतं वृत्तान्तं निवेद्य सह्यवेदनमिव दुःखं कारयिष्यामि। अथवा अस्ति मे हृदयनिर्विशेषा प्रियसखी मनोरमा। तस्या अप्येतद्वज्जया न पारयामि कथयितुम्। सर्वथा मरणं वर्जयित्वा कुतो मे हृदयस्यान्या निर्वृतिः।

Digitized by Google

मनोरमा— (साक्षम् ।) हद्धि हद्धि । अदिभूमिं गदो तवस्सिणीए अणुराओ । ता किं दाणिं एत्थ करिस्सं ।

आरण्यका— (साभिलाषम् ।) अअं सो उद्देसो रिंस मधुअरेहिं आआसिज्जन्ती ओलम्बिअ महाराएण मस्सासिदम्हि भीरु मा भआहित्ति ।

मनोरमा— (सहर्षम् ।) कहं एसा वि दिट्ठा महाराण । सव्वहा अत्थि से जीविदस्स उवाओ । जाव उवप्पिअ समस्सासेमि णं । (सहसोपसृत्य ।) जुत्तं णाम हिअस्स वि लज्जिदुं ।

आरण्यका— (सलज्जमात्मगतम् ।) हँद्धि हद्धि । ज्जं सुदं एदाए । ता एत्थ जुत्तं एव्व पआसइदुं । (प्रकाशं हस्ते गृहीत्वा ।) पिअसहि । मा कुप्प मा कुप्प । लज्जा रत्थ अवरज्झदि ।

मनोरमा---(सहर्षम् ।) सँहि । अलं संकाए । एदं मे आअक्ख । सच्चं एव्व तुमं महाराएण दिट्ठा ण वेत्ति ।

आरण्यका— (सलज्जमधोमुखी ।) सुँदं एव्व पिअसहीए सव्वं ।

---

१ हा धिक् हा धिक् । अतिभूमिं गतोऽस्यास्तपस्विन्या अनुरागः । तत्किमिदानीमत्र करिष्यामि ।

२ अयं स उद्देशो यस्मिन्मधुकरैरायास्यमानावलम्ब्य महाराजेन समाश्वासितास्मि भीरु मा बिभीहीति ।

३ कथमेषापि दृष्टा महाराजेन । सर्वथास्त्यस्या जीवितस्योपायः यावदुपसृत्य समाश्वासयाम्येनाम् । युक्त नाम हृदयस्यापि लज्जितुम् ।

४ हा धिक् हा धिक् । सर्वं श्रुतमेतया । तदत्र युक्तमेव प्रकाशयितुम् । प्रियसखि । मा कुप्य मा कुप्य । लज्जात्रापराध्यति ।

५ सखि । अलं शङ्कया । एतन्म आचक्ष्व । सत्यमेव त्वं महाराजेन दृष्टा न वेति ।

६ श्रुतमेव प्रियसख्या सर्वम् ।

Digitized by Google

मनोरमा— जइ[1] दिट्ठा महाराएण तुमं ता अ
संतप्पिदेण। सो एव्व दाणिं दंसणोवाअपज्जाउलो भवि
स्सदि।

आरण्यका— अअं[2] सहीअणो पक्खवादेण मन्तें
दि। अइ सहिपक्खवादिणि। देवीगुणणिअलणिबद्धे क
तस्सिं जणे कुदो एदं।

मनोरमा— (विहस्य।) हला[3] अपण्डिदे। कम
लिणीबद्धाणुराओ वि महुअरो मालदीं पेक्खिअ अहिणव
सास्सादलम्पडो कुदो तं अणासादिअ ट्ठिदिं करेदि।

आरण्यका— किं[4] एदिणा असंभाविदेण। त
एहि। अहिअं क्खु सरदादवेण संतप्पाइं अज्ज वि ण
अङ्गाइं संदावं मुञ्चन्दि।

मनोरमा—अअि[5] लज्जालुए। ण जुत्तं एदावत्थं गदा
ए वि दे अप्पा पच्छादिदुं।

(आरण्यका मुखमवनमयति।)

मनोरमा—अअि[6] अविसम्भसीळे। किं दाणिं पच्छादे

---

१ यदि दृष्टा महाराजेन त्वं तदलं संतापितेन। स एवेदानीं दर्शनो
पायपर्याकुलो भविष्यति।

२ अयं सखीजनः पक्षपातेन मन्त्रयते। अयि सखिपक्षपातिनि। देवी
णनिगडनिबद्धे खलु तस्मिञ्जने कुत एतत्।

३ हला अपण्डिते। कमलिनीबद्धानुरागोऽपि मधुकरो मालतीं प्रेक्ष्य
भिनवरसास्वादलम्पटः कुतस्तामनासाद्य स्थितिं करोति।

४ किमेतेनासंभावितेन। तदेहि। अधिकं खलु शरदातपेन संतप्ता
न्यद्यापि न मेऽङ्गानि संतापं मुञ्चन्ति।

५ अयि लज्जालुके। न युक्तमेतदवस्थां गतयापि त आत्मा प्रच्छाद
यितुम्।

६ अयि अविश्रम्भशीले। किमिदानीं प्रच्छादयसि। निश्वासनिर्भि
र्गतो दिवसरात्रमपि तवानुरागोऽविरतपतत्कुसुमशरशरनिवहप्रवृत्त
ङ्कारशब्द इव न भणति। अथवा न खल्वयं काल उपालम्भस्य। तद्या
वन्नलिनीपत्राण्यस्या हृदये दास्यामि। समाश्वसितु सखी समाश्वसितु सखी।

Digitized by Google

।णीसासणिहविणिग्गओ दिअहरत्तिं वि तुज्झ अणुराओ विरदपडन्तकुसुमसरसरणिवहपउण्णहुंकारसद्दो विअ ण गइ । (आत्मगतम् ।) अहवा ण हु अअं कालो उवालम्भस्स । ता जाव णलिणीपत्ताइं से हिअए दाइस्सं । (उत्थाय धैकाया नलिनीपत्राणि गृहीत्वारण्यकाया हृदये ददती ।) समस्सदु सही समस्सदु सही ।

(ततः प्रविशति विदूषकः ।)

विदूषकः—[1]अदिमहन्तो क्खु पिअवअस्सस्स आरणआए उवरि अणुराओ । जेण परिच्चत्तराअकज्जो ताए एदंसणोवाअं चिन्तअन्तो अप्पाणं विणोदेइ । (विचिन्त्य ।) हिं दाणिं तं पेक्खे । अहवा तहिं दिग्घिआए अण्णेसामि । (परिक्रामति ।)

मनोरमा—(आकर्ण्य ।) [2]पदसद्दो विअ सुणीअदि । कदलीगुम्मन्तरिदा भविअ पेक्खअ दाव को एसोत्ति ।

(उभे तथा कृत्वा पश्यतः ।)

आरण्यका—[3]कहं सो एव्व महाराअस्स पस्सपवट्टी बम्हणो ।

मनोरमा—[4]कहं वसन्तओ एव्व । (सहर्षमात्मगतम् ।) वि णाम तह हवे ।

---

१ अतिमहान्खलु प्रियवयस्यस्यारण्यकाया उपर्यनुरागः । येन त्यक्तराजकार्यस्तस्या एव दर्शनोपायं चिन्तयन्नात्मानं विनोदयति । कुतां तां प्रेक्षे । अथवा तत्र दीर्घिकायामन्विष्यामि ।

२ पदशब्द इव श्रूयते । तत्कदलीगुल्मान्तरिते भूत्वा पश्यावस्तावत्क इति ।

३ कथं स एव महाराजस्य पार्श्वपरिवर्ती ब्राह्मणः ।

४ कथं वसन्तक एव । अपि नाम तथा भवेत् ।

Digitized by Google

विदूषकः— (दिशोऽवलोक्य ।) किं[1] दाणिं आरण्णि
आ सच्चं एव्व संवुत्ता ।

मनोरमा— (सस्मितम् ।) सहि[2] । राअवअस्सो व
बह्मणो तुमं उद्दिस्सिअ मन्तेदि । ता दाव अवहिदा सुणह

(आरण्यका सस्पृहं सलज्जं च शृणोति ।)

विदूषकः— (सोद्वेगम् ।) जदा[3] दाव मए गुरुअम
अणसंदावणीसहस्स पिअवअस्सस्स अस्सत्थवअणेण
वीणं वासवदत्तापदुमावदीणं अण्णाणं अ देवीणं भवणा
अण्णेसन्तेण ण सा दिट्ठा तदा जहिं दिग्घिआए दिट्ठा इदं
दाव पेक्खिस्सं ति आअदोह्मि । ता जाव इह वि णत्थि
किं दाणिं करिस्सं ।

मनोरमा— सुदं[4] पिअसहीए ।

विदूषकः— (विचिन्त्य ।) अहवा[5] भणिदो एव्व अ
हं वअस्सेण । जइ तं अण्णेसन्तो ण पेक्खसि ता तदो
दाव दिग्घिआदो ताए करअलप्परिसदिउणिअसुहसीअला
णलिणीपत्ताइं गेण्हिअ आअच्छत्ति । ता कहं एदाइं ज
णिदव्वाइं ।

---

१ किमिदानीमारण्यका सत्यमेव संवृत्ता ।

२ सखि। राजवयस्यः खलु ब्राह्मणस्त्वामुद्दिश्य मन्त्रयते । तत्तावद
हिते शृणुवः ।

३ यदा तावन्मया गुरुमदनसंतापनिस्सहस्य प्रियवयस्यस्यास्वस्थ
चनेन देव्योर्वासवदत्तापद्मावत्योरन्यासां च देवीनां भवनान्यन्विष्
ता न सा दृष्टा तदा यत्र दीर्घिकायां दृष्टेदमपि तावत्प्रेक्षिष्य इत्यागतो
ऽस्मि । तद्यावदिहापि नास्ति । किमिदानीं करिष्ये ।

४ श्रुतं प्रियसख्या ।

५ अथवा भणित एवाहं वयस्येन। यदि तामन्विष्यन्न प्रेक्षसे तत्ततोऽ
तावद्दीर्घिकातस्तस्याः करतलस्पर्शद्विगुणितसुखशीतलानि नलिनीपत्रा
गृहीत्वागच्छेति । तत्कथमेतानि ज्ञातव्यानि ।

Digitized by Google

मनोरमा— अअं मे अवसरो[1]। (उपसृत्य विदूषकं हस्ते गृहीत्वा ।) वसन्तअ । एहि । अहं दे जाणावेमि ।

विदूषकः— (सभयम् ।) कस्स[2] तुमं जाणावेसि । किं देवीए । ण हु मए किं वि मन्तिदं ।

मनोरमा—वसन्तअ[3] । अलं संकाए । जादिसी आरण्णिआए किदे अत्तणो पिअवअस्सस्स अवत्था तुए वण्णिदा तदो दिउणदरी भट्टिणो वि किदे मम पिअसहीए अवत्था । ता पेक्ख पेक्ख । (उपसृत्यारण्यकां दर्शयति ।)

विदूषकः— (दृष्ट्वा सहर्षम् ।) सफलो[4] मे परिस्समो । सोत्थि होदीए ।

(आरण्यका सलज्जं कमलिनीपत्राण्यपनीयोत्तिष्ठति ।)

मनोरमा— अज्ज[5] वसन्तअ । तुह दंसणेण एव्व अवगदो पिअसहीए संदावो जेण सअं एव्व णलिणीपत्ताइं अवणेइ । ता अणुगण्हादु अज्जो इमाइं ।

आरण्यका—(सावेगम् ।) अइ[6] परिहाससीळे । कीस मं लज्जावेसि । (किंचित्पराङ्मुखी तिष्ठति ।)

विदूषकः — (सविषादम् ।) चिट्ठदु[7] दाव णलिणीपत्ताइं । अदिलज्जाळुआ दे पिअसही । ता कहं एदाणं समाअमो भविस्सदि ।

---

१ अयं ममावसरः । वसन्तक । एहि । अहं ते ज्ञापयामि ।

२ कस्य त्वं ज्ञापयसि । किं देव्याः । न खलु मया किमपि मन्त्रितम् ।

३ वसन्तक । अलं शङ्कया । यादृश्यारण्यकायाः कृत आत्मनः प्रियवयस्यस्यावस्था त्वया वर्णिता ततो द्विगुणतरा भर्तुरपि कृते मम प्रियसख्या अवस्था । तत्पश्य पश्य ।

४ सफलो मे परिश्रमः । स्वस्ति भवत्यै ।

५ आर्य वसन्तक । तव दर्शनेनैवापगतः प्रियसख्याः संतापो येन स्वयमेव नलिनीपत्राण्यपनयति । तदनुगृह्णात्वार्य इमानि ।

६ अयि परिहासशीले । कस्मान्मां लज्जयसि ।

७ तिष्ठन्तु तावन्नलिनीपत्राणि । अतिलज्जालुका ते प्रियसखी । कथमेतयोः समागमो भविष्यति ।

Digitized by Google

मनोरमा—(क्षणं विचिन्त्य सहर्षम् ।) वसन्तअ[1] । एव्वं विअ । (कर्णे कथयति ।)

विदूषकः—साहु पिअसहि साहु पिअसहि । (अपवार्य ।) जाव एव्व तुह्मे णेवच्छग्गहणं करेत्थ दाव एव्व अहं वि वअस्सं गेण्हिअ आअच्छामि । (इति निष्क्रान्तः ।)

मनोरमा— अदिकोवणे[2] । उट्ठेहि उट्ठेहि । णच्चिदव्वं अज्जोहिं तस्स एव्व णाडअस्स णच्चिदसेसं । ता एहि । पेक्खाघरं एव्व गच्छह्म । (परिक्रम्यावलोक्य ।) इदं पेक्खागारं । जाव एहि पविसह्म । (प्रविष्टेनावलोक्य ।) साहु साहु । सव्वं सज्जीकिदं । देवीए आअन्तव्वं ।

(ततः प्रविशति देवी साङ्कृत्यायनी विभवतश्च परिवारः ।)

वासवदत्ता— मअवदि[3] । अहो दे कवित्तणं । जेण एदं गूढउत्तन्तं णाडओवणिबद्धं साणुभवं विअ अह्माणं अज्जउत्तचरिदं अदिट्ठपुव्वं विअ दिसन्तं अहिअअरं कोदूहलं वड्ढअदि ।

साङ्कृत्यायनी— आयुष्मति । आश्रयगुण एवायमीदृशः । यदसारमपि काव्यमवश्यमेव शृण्वतां श्रवणसुखमुत्पादयति । पश्य ।

---

१ वसन्तक । एवमिव ।

२ साधु प्रियसखि साधु प्रियसखि । यावदेव युवां नेपथ्यग्रहणं कुरुथस्तावदेवाहमपि वयस्यं गृहीत्वागच्छामि ।

३ अतिकोपने । उत्तिष्ठोत्तिष्ठ । नर्तितव्यमस्माभिस्तस्यैव नाटकस्य नर्तितशेषम् । तदेहि । प्रेक्षागृहमेव गच्छावः । इदं प्रेक्षागारम् । यावदेहि प्रविशावः । साधु साधु । सर्वं सज्जीकृतम् । देव्यागन्तव्यम् ।

४ भगवति । अहो ते कवित्वम् । येनैतद्गूढवृत्तान्तं नाटकोपनिबद्धं सानुभवमिवास्माकमार्यपुत्रचरितमदृष्टपूर्वमिव दृश्यमानमधिकतरं कौतूहलं वर्धयति ।

Digitized by Google

प्रायो यत्किंचिदपि प्राप्नोत्युत्कर्षमाश्रयान्महतः ।
मत्तेभकुम्भतटगतमेति हि शृङ्गारतां भस्म ॥ १ ॥

वासवदत्ता— (सस्मितम् ।) भअवदि । सव्वस्स वल्लहो जामादो होदित्ति जाणिअदि एव्व एदं । ता किं एदिणा कहाणुबन्धेण । वरं तं एव्व णच्चिदव्वं दट्ठुं । 5

साङ्कृत्यायनी— एवम् । इन्दीवरिके । प्रेक्षागृहमादेशय ।

चेटी— एदु एदु भट्टिणी । (सर्वाः परिक्रामन्ति ।)

साङ्कृत्यायनी— (विलोक्य ।) अहो प्रेक्षणीयता प्रेक्षागृहस्य । 10

आभाति रत्नशतशोभितशातकुम्भ-
स्तम्भावसक्तपृथुमौक्तिकदामरम्यम् ।
अध्यासितं युवतिभिर्विजिताप्सरोभिः
प्रेक्षागृहं सुरविमानसमानमेतत् ॥ २ ॥

मनोरमारण्यके— (उपसृत्य ।) जेदुं जेदु भट्टिणी । 15

वासवदत्ता— मणोरमे । अदिक्कन्दा क्खु संज्झा । ता गच्छह । लहु गण्हह णेवच्छं ।

उभे— जं देवी आणवेदि । (इति प्रस्थिते ।)

वासवदत्ता— आरण्णिए । एदेहिं एव्व मदक्कपिण- 20

---

१ भगवति । सर्वस्य वल्लभो जामाता भवतीति ज्ञायत एवैतत् । तत्किमेतेन कथानुबन्धेन । वरं तदेव नर्तितव्यं द्रष्टुम् ।
२ एतु एतु भट्टिनी ।
३ जयतु जयतु भट्टिनी ।
४ मनोरमे । अतिक्रान्ता खलु संध्या । तद्गच्छतम् । लघु गृह्णीतं नेपथ्यम् ।
५ यदेव्याज्ञापयति ।
६ आरण्यके । एतैरेव मदक्कपिनद्धैराभरणैर्नेपथ्यभूमिं गत्वात्मानं

Digitized by Google

द्वेहिं आभरणेहिं णेवच्छभूमिं गदुअ अप्पाणं पसाहेहि । (आभरणान्यङ्गादवतार्यारण्यकायाः समर्पयति ।) मणोरमे । तुमं वि णलगिरिग्गहणपरितुट्ठेण तादेण अज्जउत्तस्स दिण्णाइं आभरणाइं इन्दीवरिआ सआसादो गेण्हिअ णेवच्छभूमिअं गदुअ अप्पाणं मण्डेहि जेण सुसदिसी दीससि महाराअस्स ।

(मनोरमा इन्दीवरिकासकाशादाभरणानि गृहीत्वा सहारण्यकया निष्क्रान्ता ।)

इन्दीवरिका— एदं आसणं । उवविसदु भट्टिणी ।

वासवदत्ता— (आसनं निर्दिश्य ।) उवविसदु भअवदी । (उभे उपविशतः ।)

(ततः प्रविशति गृहीतनेपथ्यः कञ्चुकी ।)

कञ्चुकी—

अन्तःपुराणां विहितव्यवस्थः
पदेपदेऽहं स्खलितानि रक्षन् ।
जरातुरः संप्रति दण्डनीत्या
सर्वं नृपस्यानुकरोमि वृत्तम् ॥ २ ॥

भोः । आज्ञापितोऽस्मि विमानिताशेषशत्रुसैन्येन यथार्थनाम्ना महासेनेन समादिश्यतामन्तःपुरेषु । यथा श्वो वयमुदयनोत्सवमनुभवामः । अतो युष्माभिरुत्सवानुरूपवेषोज्ज्वलेन परिजनेन सह मन्मथोद्यानं गन्तव्यमिति ।

साङ्कृत्यायनी— (कञ्चुकिनं निर्दिश्य ।) राजपुत्रि ! प्रवृत्ता प्रेक्षा । दृश्यताम् ।

प्रसाधय । मनोरमे । त्वमपि नलगिरिग्रहणपरितुष्टेन तातेनार्यपुत्रस्य दत्तान्याभरणानीन्दीवरिकासकाशाद्गृहीत्वा नेपथ्यभूमिं गत्वात्मानं मण्डय येन सुसदृशी दृश्यसे महाराजस्य ।

१ इदमासनम् । उपविशतु भट्टिनी ।

२ उपविशतु भगवती ।

Digitized by Google

कञ्चुकी— तदेतदादेष्टव्यं परिजनेन सह गन्तव्यमिति । गृहीतनेपथ्येनेति नादेष्टव्यम् । कुतः ।

नादैर्नूपुरिभिर्नितम्बफलकैः शिञ्जानकाञ्चीगुणै-
र्हारापादितकान्तिभिः स्तनतटैः केयूरिभिर्बाहुभिः ।
कर्णैः कुण्डलिभिः करैः सवलयैः सस्वस्तिकैर्मूर्धजै-
र्देवीनां परिचारिकापरिजनोऽप्येतेषु संदृश्यते ॥ ४ ॥

न खलु किंचिदत्रापूर्वमनुष्ठेयम् । केवलं स्वाम्यादेश इति मत्वाहं समादिष्टः । तदाज्ञाशेषं राजपुत्र्यै निवेदयामि । (परिक्रम्यावलोक्य च ।) इयं सा वासवदत्ता वीणाहस्तया काञ्चनमालयानुगम्यमाना गन्धर्वशालां प्रविष्टा । यावदस्याः कथयामि । (परिक्रामति ।)

(ततः प्रविशति गृहीतवासवदत्तानेपथ्यासनस्थारण्यका वीणाहस्ता काञ्चनमाला च ।)

आरण्यका— हला[1] कञ्चणमाले । कीस उण चिरादि अज्ज वि वीणाआरिओ ।

काञ्चनमाला— भट्टिदारिए[2] । दिट्ठो देण एक्को उम्मत्तो । तस्स वअणं सुणिअ चित्तेण भाविदो ओहसन्तो चिट्ठइ ।

आरण्यका— (सहस्ततालं विहस्य ।) हञ्जे[3] । सुट्ठु एदं पुच्छदि । सरिसा सरिसे रञ्जन्तित्ति दुवे एत्थ उम्मत्ता ।

साङ्कृत्यायनी— राजपुत्र्याः सदृशमाकारं पश्यास्यास्तादृशेनाकारेणावश्यं त्वदीयां भूमिकां संभावयिष्यति ।

---

१ हला काञ्चनमाले । कस्मात्पुनश्चिरयत्यद्यापि वीणाचार्यः ।

२ भर्तृदारिके । दृष्टस्तेनैक उन्मत्तः । तस्य वचनं श्रुत्वा चित्रेण भावितोऽपहसंस्तिष्ठति ।

३ हञ्जे । सुष्ठ्वेतं पृच्छति । सदृशाः सदृशे रजन्त इति द्वावत्रोन्मत्तौ ।

Digitized by Google

कञ्चुकी—(उपसृत्य ।) राजपुत्रि । देवस्त्वमाज्ञापयति । श्वोऽवश्यमस्माभिर्वीणां वादयन्ती श्रोतव्या । तत्त्वया नवतन्त्रीसज्जया घोषवत्या स्थेयमिति।

आरण्यका— जं इ एव्वं लहु वीणाआरिअं विसज्जेहि ।

कञ्चुकी—एष वत्सराजं प्रेषयामि । (इति निष्क्रान्तः ।)

आरण्यका— कञ्चणमाले[2] । उवणेहि मे घोसवदीं जाव से तन्तीओ परिक्खेमि ।

(काञ्चनमाला वीणामर्पयति । आरण्यकोत्सङ्गे वीणां कृत्वा सारयति ।)

(ततः प्रविशति गृहीतवत्सराजनेपथ्या मनोरमा ।)

मनोरमा—(स्वगतम् ।) चिराअदि[3] क्खु महाराओ। किं ण कहिदं वसन्तएण । आदु देवीए भाअदि । जदाणिं आअच्छे तदो रमणिज्जं हवे ।

(ततः प्रविशति राजावगुण्ठितशरीरो विदूषकश्च ।)

राजा—

संतापं प्रथमं तथा न कुरुते शीतांशुरद्यैव मे
निश्वासा गलपयन्त्यजस्रमधुनैवोष्णास्तथा नाधरम् ।
संप्रत्येव मनो न शून्यमलसान्यङ्गानि नो पूर्ववद्-
दुःखं याति मनोरथेषु तनुतां संचिन्त्यमानेष्वपि ॥९॥

वयस्य । सत्यमेवोक्तं मनोरमया । यथैषा मम प्रियसखी महाराजस्य देव्या दर्शनपथादपि रक्ष्यते तदयं समागमोपायः । अद्य रात्रावस्माभिरुदयनचरितं नाम नाटकं देव्याः पुरतो नर्तितव्यम् । तत्रारण्यका वासवदत्ता भविष्यति ।

---

१ यद्येवं लघु वीणाचार्यं विसर्जय ।

२ काञ्चनमाले । उपनय मे घोषवतीं यावदस्यास्तन्त्रीः परीक्षे ।

३ चिरयति खलु महाराजः । किं न कथितं वसन्तकेन । अथवा देव्या बिभेति । यदीदानीमागच्छेत्ततो रमणीयं भवेत् ।

Digitized by Google

महमपि वत्सराजः । त्वरितेनैव सर्वं शिक्षितव्यम् । तदा-
स्य स्वयमेव स्वां भूमिकां कुर्वाणः समागमोत्सवमनुभव-
त्विति ।

विदूषकः—जइ मं ण पत्तिआअसि एसा मणोरमा
इह वेसं धारअन्ती चिट्ठइ । ता उवसप्पिअ सअं एव्व पुच्छ । 5

राजा— (मनोरमामुपसृत्य ।) मनोरमे । सत्यमिदं य-
दसन्नकोऽभिधत्ते ।

मनोरमा—भट्टा । सच्चं एव्व । मण्डअ एदेहिं आभ-
रणेहिं अप्पाणं । (इत्याभरणान्यङ्गादवतार्य राज्ञे समर्पयति ।)

(राजा परिदधाति ।) 10

विदूषकः— एदे क्खु राआणो दासीए वि एव्वं ण-
च्चाविअन्ति । अहो कज्जस्स गरुअदा ।

राजा— (विहस्य ।) मूर्ख । नैष कालः परिहासस्य ।
नेपथ्येन चित्रशालां प्रविश्य मनोरमया सहास्मन्नृत्तं प-
श्यता स्थीयताम् । 15

(उभौ तथा कुरुतः ।)

आरण्यका—कञ्चणमाले । चिट्ठदु वीणा । पुच्छिस्सं
ताव किं वि ।

राजा— शृणोमि तावत्कृतमोऽयमुद्देशो वर्तते । (इत्य-
वहितः शृणोति ।) 20

काञ्चनमाला— पुच्छदु भट्टिदारिआ ।

---

१ यदि मां न प्रत्याययस्येषा मनोरमा तव वेषं धारयन्ती तिष्ठति । उपसृप्य स्वयमेव पृच्छ ।

२ भर्तः । सत्यमेव । मण्डयैतैराभरणैरात्मानम् ।

३ एते खलु राजानो दास्यापि एवं नर्त्यन्ते । अहो कार्यस्य गुरुता ।

४ काञ्चनमाले । तिष्ठतु वीणा । प्रक्ष्यामि तावत्किमपि ।

५ पृच्छतु भर्तृदारिका ।

Digitized by Google

आरण्यका— सच्चं एव्व तादो मन्तेदि एव्वं [illegible] ह जइ वीणं वादअन्तो अवहरेदि मं वच्छराओ अवस्सं बन्धणादो मुच्चेमित्ति ।

राजा— (प्रविश्य पटाक्षेपेण सहर्षं वत्रान्ते प्रथितं पश्यति ।) एवमेतत् । कः संदेहः ।

सपरिजनं प्रद्योतं विस्मयमुपनीय वादयन्वीणाम् ।
वासवदत्तामपहरामि न चिरादेव पश्याम्यहम् ॥ ६ ॥

यतः सुसंनिहितं सर्वं यौगन्धरायणेन ।

वासवदत्ता— (सहसोत्थाय ।) जेदु[1] जेदु अज्जउत्तो[2] ।

राजा— (स्वगतम् ।) कथं प्रत्यभिज्ञातोऽस्मि देव्या ।

साङ्कृत्यायनी— (सस्मितम् ।) राजपुत्रि । अलमलं संभ्रमेण । प्रेक्षणीयकमेतत् ।

राजा— (आत्मगतं सहर्षम् ।) इदानीमुच्छ्वासितोऽस्मि ।

वासवदत्ता— (सविलक्षस्मितमुपविश्य ।) कहं[3] मणोरमा एसा । मए उण जाणिदं अज्जउत्तो एसोत्ति । साहु मणोरमे साहु । सोहणं णच्चिदं ।

साङ्कृत्यायनी— राजपुत्रि । स्थान एव कृता भ्रान्तिस्ते मनोरमया । पश्य ।

रूपं तन्नयनोत्सवास्पदमिदं वेषः स एवोज्ज्वलः
सा मत्तद्विरदोचिता गतिरियं तत्सत्वमत्यूर्जितम् ।
लीला सैव स एव सान्द्रजलदच्छादानुकारी स्वरः
साक्षाद्दर्शित एष नः कुशलया वत्सेश एवानया ॥ ७ ॥

---

१ सत्यमेव तातो मन्त्रयते एवं यथा यदि वीणां वादयन्नपहरति मां वत्सराजोऽवश्यं बन्धनान्मुच्चामीति ।

२ जयतु जयत्वार्यपुत्रः ।

३ कथं मनोरमैषा । मया पुनर्ज्ञातमार्यपुत्र एष इति । साधु मनोरमे साधु । शोभनं नर्तितम् ।

Digitized by Google

वासवदत्ता— [1]हञ्जे इन्दीवरिए। बद्धेण अज्जउत्तेण अहं वीणं सिक्खाविदा। ता से करेहि णीलुप्पलदामण णिअली। (शिरसोऽपनीय नीलोत्पलदामार्पयति।)

(इन्दीवरिका तथा कृत्वा पुनस्तत्रैवोपविशति।)

आरण्यका— [2]कञ्चणमाले। कहेहि कहेहि। णं सइं एव्व मन्तेदि तादो जइ वीणं वादअन्तो अवहरेदि मं वच्छराओ तदो अवस्सं बन्धणादो मुच्चेमित्ति।

काञ्चनमाला— [3]भट्टिदारिए सच्चं। तह करेहि जह वच्छराअस्स अवस्सं बहुमदा होसि।

राजा— निष्पादितमेव काञ्चनमालया यत्तदस्माभिरभिलषितम्।

आरण्यका— [4]जइ एव्वं ता आदरेण वादइस्सं। (गायन्ती वादयति।)

घणबन्धणसंरुद्धं गअणं दट्ठूण माणसं एदुं।
अहिलसइ राअहंसो दइअं घेऊण अप्पणो वसइं॥८॥

(विदूषको निद्रां नाटयति।)

मनोरमा— (हस्तेन चालयन्ती।) [5]वसन्तअ। पेक्ख पेक्ख। पिअसही मे णच्चइ।

विदूषकः—(सरोषम्।) [6]दासीए सुदे। तुमं वि ण देसि

---

१ हञ्जे इन्दीवरिके। बद्धेनार्यपुत्रेणाहं वीणां शिक्षिता। तदस्य कुरु नीलोत्पलदामकेन निगडिनम्।

२ काञ्चनमाले। कथय कथय। ननु सत्यमेव मन्त्रयते तातो यदि वीणां वादयन्नपहरति मां वत्सराजस्ततोऽवश्यं बन्धनान्मुञ्चामीति।

३ भर्तृदारिके सत्यम्। तथा कुरु यथा वत्सराजस्यावश्यं बहुमता भवसि।

४ यद्येवं तदादरेण वादयिष्यामि।

घनबन्धनसंरुद्धं गगनं दृष्ट्वा मानसं एतुम्।
अभिलषति राजहंसो दयितां गृहीत्वात्मनो वसतिम्॥

५ वसन्तक। पश्य पश्य। प्रियसखी मे नृत्यति।

६ दास्याः सुते। त्वमपि न ददासि स्वपुम्। यदा प्रभृति प्रियवयस्येनार-

Digitized by Google

सुविदुं । जदप्पहुदि पिअवअस्सेण आरण्णिआ दिट्ठा सद-
प्पहुदि तेण सह मए दिवारत्तं णिद्दा ण दिट्ठा । ता आरण्ण
दो णिक्कमिअ सुविस्सं । (निष्क्रम्य शेते ।)

(आरण्यका पुनर्गायति ।)

अहिणवराअक्खित्ता महुअरिआ वामएण कामेण ।
उत्तम्मइ पत्थन्ती दट्ठुं पिअदंसणं दइअं ॥ ९ ॥

राजा— (तत्क्षणं श्रुत्वा सहसोपसृत्य ।) साधु राजपुत्रि
साधु । अहो गीतमहो वादित्रम् । तथाहि ।

व्यक्तिर्व्यअनधातुना दशविधेनाप्यत्र लब्धाधुना
विस्पष्टो द्रुतमध्यलम्बितपरिच्छिन्नस्त्रिधार्यं लयः ।
गोपुच्छप्रमुखाः क्रमेण यतयस्तिस्रोऽपि संपादिता-
स्तत्स्वौघानुगताश्च वाद्यविधयः सम्यक्कलयो दर्शिताः १०

आरण्यका—(वीणां परिष्वज्यासनादुत्थाय राजानं साभि
लाषं पश्यन्ती ।) उवज्झाअ । पणमामि ।

राजा— (सस्मितम् ।) यदहमिच्छामि तत्ते भूयात् ।

काञ्चनमाला— (आरण्यकाया आसनं निर्दिश्य ।) इ
ह एव्व उवविसदु उवज्झाओ ।

राजा— (उपविश्य ।) राजपुत्री केदानीमुपविशतु ।

काञ्चनमाला— (सस्मितम् ।) दाणिं एव्व भट्टिदा-
रिआ विज्जामाणेण परितोसिदा तुह्मेहिं । ता अरुहदि ए
व्व एसा उवज्झाअपीठिआए ।

ण्यका दृष्टा तदा प्रभृति तेन सह मया दिवारात्रं निद्रा न दृष्टा । तद
न्यतो निष्क्रम्य स्वप्स्यामि ।

१ अभिनवरागक्षिप्ता मधुकरिका वामकेन कामेन ।
उत्ताम्यति प्रार्थयमाना द्रष्टुं प्रियदर्शनं दयितम् ॥

२ उपाध्याय । प्रणमामि ।

३ इहैवोपविशतु उपाध्यायः ।

४ इदानीमेव भर्तृदारिका विद्यामानेन परितोषिता युष्माभिः । तद
इत्येवैषोपाध्यायपीठिकायाम् ।

Digitized by Google

राजा— उपविशत्वार्येयमर्धासनस्य । राजपुत्रि । स्थीयताम् ।

(आरण्यका काञ्चनमालां पश्यति ।)

काञ्चनमाला—(सस्मितम्) भट्टिदारिए[1] । उवविस । को एत्थ दोसो । सिस्सविसेसा क्खु तुमं । 5

(आरण्यका सलज्जमुपविशति ।)

वासवदत्ता— (सलज्जम् ।) अवदीए[2] अहिअं कप्पिदं कव्वं । ण हु अहं तस्सिं काले एकासणे अज्जउत्तेण सह उवट्ठिदा ।

राजा— राजपुत्रि । पुनः श्रोतुमिच्छामि । वादय वीणाम् । 10

आरण्यका—(सस्मितम् ।) कञ्चणमाले[3] । चिरं खु मम वादअन्तीए परिस्समो जादो । दाणिं णिस्सहाइं अङ्गाइं । ता ण सक्कुणोमि वादइदुं ।

काञ्चनमाला—उवज्झाअ[4] । सुट्ठु परिस्सन्ता भट्टिदारिआ । कवोलतलबद्धसेअलवाए पेक्ख से वेवन्ति अग्गहत्था । ता समस्सत्ता होदु मुहुत्तअं । 15

राजा—काञ्चनमाले । युक्तमभिहितम् । (हस्तेन ग्रहीतुमिच्छति ।)

(आरण्यका हस्तमपसारयति ।) 20

---

१ भर्तृदारिके । उपविश । कोऽत्र दोषः । शिष्यविशेषा खलु त्वम् ।

२ भगवत्याधिकं कल्पितं काव्यम् । न खल्वहं तस्मिन्काल एकासने आर्यपुत्रेण सहोपस्थिता ।

३ काञ्चनमाले । चिरं खलु मम वादयन्त्याः परिश्रमो जातः । इदानीं निःसहान्यङ्गानि । तन्न शक्नोमि वादयितुम् ।

४ उपाध्याय । सुष्ठु परिश्रान्ता भर्तृदारिका । कपोलतलबद्धस्वेदलवायाः पश्यास्या वेपेते अग्रहस्तौ । तत्समाश्वस्ता भवतु मुहूर्तम् ।

Digitized by Google

वासवदत्ता—(सासूयम् ।) भअवदि । अहिअं प
वि तुए किदं । ण हु अहं कञ्चणमालाकव्वेण वञ्चइदव्वा

साङ्कृत्यायनी—(विहस्य ।) आयुष्मति । ईदृशमे
काव्यं भविष्यति ।

आरण्यका— (सरोषमिव ।) अवेहि कञ्चणमा
अवेहि । ण मे बहुमदासि ।

काञ्चनमाला—(सस्मितम् ।) जइ अहं चिट्ठन्ती प
बहुमदा ता एसा गच्छह्मि । (इति निष्क्रान्ता ।)

आरण्यका—(ससंभ्रमम् ।) कञ्चणमाले । चिट्ठ चि
ट्ठ । अअं से अग्गहत्थो समप्पिदो ।

राजा— (आरण्यकाया हस्तं गृहीत्वा ।)

सद्योऽवश्यायबिन्दुव्यतिकरशिशिरः किं भवेत्पद्मकोशो
ह्लादित्वं नास्य मन्ये सदृशमिदमुषस्येव वीतातपस्य ।
मुञ्चन्त्येते हिमौघं नखरजनिकराः पश्य किं सोऽपि दाहं
ज्ञातं स्वेदापदेशादविरतममृतं स्यन्दते व्यक्तमेतत्॥ ११॥

अपि च ।

एतेन बालविद्रुमपल्लवशोभापहारदक्षेण ।
हृदये मम त्वयायं न्यस्तो रागः स्वहस्तेन ॥ १२ ॥

आरण्यका— (स्पर्शविशेषं नाटयन्ती ।) हेद्धि हद्धि ।

---

१ भगवति । अधिकमेतदपि त्वया कृतम् । न खल्वहं काञ्चनमालाका-व्येन वञ्चयितव्या ।

२ अपेहि काञ्चनमाले अपेहि । न मे बहुमतासि ।

३ यद्यहं तिष्ठन्ती न बहुमता तदेषा गच्छामि ।

४ काञ्चनमाले । तिष्ठ तिष्ठ । अयमस्याग्रहस्तः समर्पितः ।

५ हा धिक् हा धिक् । एतां मनोरमां स्पृशन्त्या अनर्थमेव मेऽङ्गानि कुर्वन्ति ।

Digitized by Google

एदं मणोरमं परिसन्तीए अणत्थं एव्व मे अङ्गाइं करेन्ति ।

वासवदत्ता— (सहसोत्थाय ।) भअवदि[1] । पेक्ख तुमं । अहं उण अलिअं ण पारेमि पेक्खिदुं ।

साङ्कृत्यायनी— राजपुत्रि । धर्मशास्त्रविहित एष गान्धर्वो विवाहः । किमत्र लज्जास्थानम् । प्रेक्षणीयकमिदम् । तन्न युक्तमस्थाने रसभङ्गं कृत्वा गन्तुम् ।

(वासवदत्ता परिक्रामति ।)

इन्दीवरिका— (विलोक्य ।) भट्टिणि[2] । वसन्तओ[3] चित्तसालादुवारे पसुत्तो चिट्ठइ ।

वासवदत्ता— (निरूप्य ।) वसन्तओ[3] एव्व एसो । (विचिन्त्य ।) रण्णा वि एत्थ होदव्वं । ता बोधिअ पुच्छिस्सं दाव णं । (प्रबोधयति ।)

विदूषकः— (निद्राजडमुत्थाय सहसा विलोक्य ।) मणोरमे[4] । किं णच्चिअ आअदो पिअवअस्सो[5] । आदु णच्चदि एव्व ।

वासवदत्ता—(सविषादम् ।) कहं[6] अज्जउत्तो णच्चदि । मणोरमा दाणिं कहिं ।

विदूषकः— एसा[7] चित्तसालाए चिट्ठइ ।

मनोरमा— (सभयमात्मगतम् ।) कहं[8] अण्णहा एव्व

---

१ भगवति । पश्य त्वम् । अहं पुनरलोकं न पारयामि प्रेक्षितुम् ।

२ भर्तृदारिके । वसन्तकश्चित्रशालाद्वारे प्रसुप्तस्तिष्ठति ।

३ वसन्तक एवैषः । राज्ञाप्यत्र भवितव्यम् । तद्बोधयित्वा प्रक्ष्यामि गतवृत्तान्तम् ।

४ मनोरमे । किं नर्तित्वागतः प्रियवयस्यः । अथवा नृत्यत्येव ।

५ कथमार्यपुत्रो नृत्यति । मनोरमेदानीं कुत्र ।

६ एषा चित्रशालायां तिष्ठति ।

७ कथमन्यथैव हृदये कृत्वा देव्या मन्त्रितम् । एतेनापि मूर्खवटुकेनान्यथैव बुद्ध्वा सर्वमाकुलीकृतम् ।

Digitized by Google

हिअए करिअ देवीए मन्तिदं । एदेण वि मुक्खबडुएण अण्णहा एव्व बुद्धिअ सव्वं आउलीकिदं ।

वासवदत्ता— (सरोषं हसन्ती ।) साहु मणोरमे साहु । सोहणं तुए णच्चिदं ।

मनोरमा— (सभयं कम्पमाना पादयोर्निपत्य ।) भट्टिणि[1] । ण हु अहं एत्थ अवरज्झामि । एदेण खु हदासेण बळादो अळंकरणाइं गेण्हिअ दुवारट्ठिदेण इह णिरुद्धा । ण उण मह अक्कन्दन्तीए सद्दो मुक्खणिग्घोसन्तरिओ केण वि सुदो[2] ।

वासवदत्ता— हञ्जे[3] उट्ठेहि । जाणिदं सव्वं । वसन्तओ क्खु आरण्णिआउत्तन्तणाडए सुत्तधारो[4] ।

विदूषकः— सेअं एव्व चिन्तेहि । कहिं आरण्णिआ कहिं वसन्तओत्ति ।

वासवदत्ता— मणोरमे[5] । सुगहीदं करिअ णं आअच्छ दाव पेक्खणीअं से पेक्खामि ।

मनोरमा—(स्वगतम् ।) दाणिं समस्ससिदम्हि[6] । (प्रकाशम् । विदूषकं करे बध्नाति ।) हदास । दाणिं अणुभव अत्तणो दुण्णअस्स फळं ।

वासवदत्ता— (ससंभ्रममुपसृत्य ।) अज्जउत्त[7] ।

---

१ साधु मनोरमे साधु । शोभनं त्वया नर्तितम् ।

२ भट्टिनि । न खल्वहमत्रापराध्यामि । एतेन खलु हताशेन बलादलंकारान्गृहीत्वा द्वारस्थितेनेह निरुद्धा । न पुनर्ममाक्रन्दन्त्याः शब्दो मूर्खनिर्घोषान्तरितः केनापि श्रुतः ।

३ हञ्जे उत्तिष्ठ । ज्ञातं सर्वम् । वसन्तकः खल्वारण्यकावृत्तान्तनाटके सूत्रधारः ।

४ स्वयमेव चिन्तय । कुत्रारण्यका कुत्र वसन्तक इति ।

५ मनोरमे । सुगृहीतं कृत्वैनमागच्छ तावत्प्रेक्षणीयमस्य पश्यामि ।

६ इदानीं समाश्वसितास्मि । हताश । इदानीमनुभवात्मनो दुर्नयस्य फलम् ।

७ आर्यपुत्र । प्रतिहतमेतदमङ्गलम् । मर्षयत्वार्यपुत्रो यन्मनोरमेति कृत्वा नीलोत्पलदामकेन बन्धितोऽसि ।

Digitized by Google

पडिहदं एदं अमङ्गलं । (इति पादयोर्नीलोत्पलदामापनयन्ती सोत्रासम् ।) मरिसदु अज्जउत्तो जं मणोरमेत्ति करिअ णीलुप्पलदामएण बन्धाविदोसि ।

(आरण्यका सभयमपसृत्य तिष्ठति ।)

राजा— (सहसोत्थाय विदूषकं मनोरमां च दृष्ट्वात्मगतम् ।) कथं विज्ञातोऽस्मि देव्या । (वैलक्ष्यं नाटयति ।)

साङ्कृत्यायनी— (सर्वानवलोक्य सस्मितम् ।) कथमन्यदेवेदं प्रेक्षणीयकं संवृत्तम् । अभूमिरियमस्मद्विधानाम् । (इति निष्क्रान्ता ।)

राजा— (स्वगतम् ।) अपूर्वोऽयं कोपप्रकारः । दुर्लभमत्रानुनयं पश्यामि । (विचिन्त्य ।) एवं तावत्करिष्ये । (प्रकाशम् ।) देवि । त्यज्यतां कोपः ।

वासवदत्ता— अज्जउत्त[1] । को एत्थ कुविदो ।

राजा— कथं न कुपितासि ।

स्निग्धं यद्यपि वीक्षितं नयनयोस्ताम्रा तथापि द्युतिर्माधुर्येऽपि सति स्खलत्यनुपदं ते गद्गदा वागियम् ।
निश्वासा नियता अपि स्तनभरोत्कम्पेन संलक्षिताः
कोपस्ते प्रकटप्रयत्नविधृतोऽप्येष स्फुटं लक्ष्यते ॥१३॥

(पादयोर्निपत्य ।) प्रसीद प्रसीद ।

वासवदत्ता— आरण्णिए[2] । तुमं कुविदत्ति संभावअन्तो अज्जउत्तो पिए पसीदत्ति पसादअदि । ता उवसप्प (इति हस्तेनाकर्षयति ।)

---

१ आर्यपुत्र । कोऽत्र कुपितः ।

२ आरण्यके । त्वं कुपितेति संभावयन्नार्यपुत्रः प्रिये प्रसीदेति प्रसादयति । तदुपसर्प ।

Digitized by Google

आरण्यका— (सभयम् ।) भट्टिणि[1] । ण हु अहं किं वि जाणामि ।

वासवदत्ता—आरण्णिए[2] । तुमं कहं ण आणासि । दाणिं दे सिक्खावेमि । इन्दीवरिए । गेण्ह एदं ।

विदूषकः—[3]होदि । अज्ज कोमुदीमहूसवे तुह चित्तं अवहरिदुं वअस्सेण पेक्खणीअं अणुचिट्ठिदं ।

वासवदत्ता— [4]एदं तुह्माणं दुण्णअं पेक्खिअ हासो मे जाअदि ।

राजा— देवि । अलमन्यथा विकल्पितेन । पश्य ।

भ्रूभङ्गैः क्रियते ललाटशशिनः कस्मात्कलङ्को मुधा
वाताकम्पितबन्धुजीवसमतां नीतोऽधरः किं स्फुरन् ।
मध्यश्चाधिककम्पितस्तनभरेणायं पुनः खिद्यते
कोपं मुञ्च तवैव चित्तहरणायैतन्मया क्रीडितम् ॥१४॥

देवि । प्रसीद प्रसीद । (इति पादयोः पतति ।)

वासवदत्ता—[5]हञ्जे । णिवुत्तं पेक्खणअं । ता एहि । अब्भन्तरं एव्व पविसह्म । (इति निष्क्रान्ता ।)

राजा—(विलोक्य ।) कथमकृत्वैव प्रसादं गता देवी।
स्वेदाम्भःकणभिन्नभीषणतरभ्रूभङ्गमेकं रुषा
त्रासेनापरमुत्प्लुतोत्प्लुतमृगव्यालोलनेत्रोत्पलम् ।
उत्पश्यन्नहमग्रतो मुखमिदं देव्याः प्रियायास्तथा

---

१ भट्टिनि । न खल्वहं किमपिजानामि ।

२ आरण्यके । त्वं कथं न जानासि । इदानीं ते शिक्षयामि । इन्दीवरिके । गृहाणैनाम् ।

३ भवति । अद्य कौमुदीमहोत्सवे तव चित्तमपहर्तुं वयस्येन प्रेक्षणीयमनुष्ठितम् ।

४ एतं युष्माकं दुर्नयं प्रेक्ष्य हासो मे जायते ।

५ हञ्जे । निवृत्तं प्रेक्षणकम् । तदेहि । अभ्यन्तरमेव प्रविशावः ।

Digitized by Google

भीतश्रोत्सुकमानसश्च महति क्षिप्तोऽस्म्यहं संकटे १६ तद्यावदिदानीं शयनीयं गत्वा देव्याः प्रसादनोपायं चिन्तयामि ।

(इति निष्क्रान्ताः सर्वे ।)

इति तृतीयोऽङ्कः ।

इति गर्भनाटकम् ।

॥ चतुर्थोऽङ्कः ॥

(ततः प्रविशति मनोरमा ।)

मनोरमा—(सोद्वेगम् ।) अहो दिग्घरोसदा देवीए । कहं एत्तिअं कालं बद्धाए पिअसहीए आरण्णिआए उवरि अणुकम्पं ण गेण्हइ । (साक्षम् ।) सा तवस्सिणी अत्तणो बन्धणस्स किलेसेण तह ण संतप्पदि जह भट्टिणो दंसणणिरासदाए । ईरिसं च से दुक्खं जेण अज्ज एव्व अत्ताणं वावादअन्ती मए कहं वि णिवारिदा । एदं उत्तन्तं भट्टिणो णिवेदेहित्ति वसन्तअं भणिअ आअदम्हि ।

(ततः प्रविशति काञ्चनमाला ।)

काञ्चनमाला—कहं अण्णेसन्तीए वि मए भअवई सङ्किच्चाअणी ण दिट्ठा । (विलोक्य ।) ता एदं वि दाव मणोरमं पुच्छिस्सं । (उपसृत्य ।) मणोरमे । अवि जाणासि कहिं भअवई सङ्किच्चाअणित्ति ।

---

१ अहो दीर्घरोषता देव्याः । कथमेतावन्तं कालं बद्धायाः प्रियसख्या आरण्यकाया उपर्यनुकम्पां न गृह्णाति । सा तपस्विन्यात्मनो बन्धनस्य क्लेशेन तथा न संतप्यते यथा भर्तुर्दर्शननिराशतया । ईदृशं चास्या दुःखं येनाद्यैवात्मानं व्यापादयन्ती मया कथमपि निवारिता । एतं वृत्तान्तं भर्त्रे निवेदयेति वसन्तकं भणित्वागताऽस्मि ।

२ कथमन्विष्यन्त्यापि मया भगवती साङ्कृत्यायनी न दृष्टा । तदेतामपि तावन्मनोरमां प्रक्ष्यामि । मनोरमे । अपि जानासि कुत्र भगवती साङ्कृत्यायनीति ।

Digitized by Google

मनोरमा— (विलोक्याश्रूणि प्रमृज्य ।) हला कञ्चणमाले । दिट्ठा । किं उण ताए पओअणं ।

काञ्चनमाला—मणोरमे । अज्ज देवीए अङ्गारवदीए लेहो पेसिदो । तस्सिं वाचिदे बप्फपुण्णणअणा दिढं संतप्पिदुं आरद्धा देवी । ता विणोदणणिमित्तं ताए भअवदिं अण्णेसामि ।

मनोरमा— हला किं उण तस्सिं लेहे आलिहिदं

काञ्चनमाला—जाँ मम भइणिआ सा तव जणणी एव्व । ताए भत्ता दिढवम्मा तादो दे । ता तव किं एदं आअक्खिदव्वं । तस्स समहिअं संवच्छरं कलिङ्गहदएण बद्धस्स । ता ण जुत्तं एदं उत्तन्तं अणिट्ठं सुणिअ समीवट्ठिदस्स समत्थस्स भत्तुणो दे एव्वं उदासीणत्तणं ओलम्बिदुंति ।

मनोरमा— हला कञ्चणमाले । जदा दाव अअं उत्तन्तो भट्टिणीए ण केण वि वाइदव्वोत्ति भट्टिणा आणत्तं ता केण उण दाणिं सो लेहो सुणाविदो ।

काञ्चनमाला— अणुवाइअ तुण्हींभूदाए मह हत्थादो गेण्हिअ सअं एव्व भट्टिणीए वाइदो ।

---

१ हला काञ्चनमाले । दृष्टा । किं पुनस्तया प्रयोजनम् ।

२ मनोरमे । अद्य देव्याङ्गारवत्या लेखः प्रेषितः । तस्मिन्वाचिते बाष्पपूर्णनयना दृढं संतप्तुमारब्धा देवी । तद्विनोदननिमित्तं तस्या भगवतीमन्विष्यामि ।

३ हला किं पुनस्तस्मिंल्लेख आलिखितम् ।

४ या मम भगिनी सा तव जनन्येव । तस्या भर्ता दृढवर्मा तातस्ते । तत्तव किमेतदाख्यातव्यम् । तस्य समधिकं संवत्सरं कलिङ्गहतकेन बद्धस्य । तन्न युक्तमेतं वृत्तान्तमनिष्टं श्रुत्वा समीपस्थितस्य समर्थस्य भर्तुस्ते एवमुदासीनत्वमवलम्बितुमिति ।

५ हला काञ्चनमाले । यदा तावदयं वृत्तान्तो भट्टिन्यै न केनापि वाचयितव्य इति भर्त्राज्ञप्तं तत्केन पुनरिदानीं स लेखः श्रावितः ।

६ अनुवाच्य तूष्णींभूताया मम हस्ताद्गृहीत्वा स्वयमेव भट्टिन्यावाचितः ।

Digitized by Google

मनोरमा— तेण[1] गच्छ तुमं । एसा क्खु देवी ताए एव्व सह दन्तवलहीए चिट्ठइ ।

काञ्चनमाला— तेण[2] हि भट्टिणीसआसं गमिस्सं । (इति निष्क्रान्ता ।)

मनोरमा—चिरं[3] खु मे आरण्णिआसआसादो आअदाए । दिढं च णिव्विण्णा सा तवस्सिणी अत्तणो जीविदेण । कदाइ अज्जाहिदं भवे । ता तहिं एव्व गच्छह्मि । (इति निष्क्रान्ता ।)

(इति प्रवेशकः ।)

(ततः प्रविशति सोद्वेगासनस्था वासवदत्ता साङ्कृत्यायनी विभवतश्च परिवारः ।)

साङ्कृत्यायनी— राजपुत्रि । अलमुद्वेगेन । नेदृशो वत्सराजः । कथमित्थंगतमपि भवत्या मातृष्वसृपतिं विज्ञाय वत्सराजो निश्चिन्तं स्थास्यति ।

वासवदत्ता—(साम्रम् ।) भैअवदि । अदिउज्जुआ[4] दाणिं तुमं । जस्स मए ण कज्जं तस्स ममकेरएण किं कज्जं । अज्जुआए जुत्तं मम एदं आलिहिदुं । सा उण ण आणादि अज्जवि तारिसी ण वासवदत्तेत्ति । तुह उण एदं आरण्णिआए उत्तन्तं पच्चक्खं । ता कहं एदं भणासि ।

---

१ तेन गच्छ त्वम् । एषा खलु देवी तयैव सह दन्तवलभ्यां तिष्ठति ।

२ तेन हि भट्टिनीसकाशं गमिष्यामि ।

३ चिरं खलु म आरण्यकासकाशादागतायाः । दृढं च निर्विण्णा सा तपस्विन्यात्मनो जीवितेन । कदाचिदत्याहितं भवेत् । तत्तत्रैव गच्छामि ।

४ भगवति । अतिऋजुकेदानीं त्वम् । यस्य मया न कार्यं तस्य मदीयेन किं कार्यम् । आर्याया युक्तं ममैतदालिखितुम् । सा पुनर्न जानात्यद्यापि तादृशी न वासवदत्तेति । तव पुनरेष आरण्यकावृत्तान्तं प्रत्यक्षम् । तत्कथमेतद्भणसि ।

Digitized by Google

साङ्कृत्यायनी— यत एव मे प्रत्यक्षं तत एव ब्रवीमि। तेन ननु कौमुदीमहोत्सवे त्वां हासयितुं तथा क्रीडितम्।

वासवदत्ता—भअवदि[1]। एदं एत्थ सच्चं। तह हासिदम्हि जेण भअवदीए पुरदो लज्जाए कहं वि चिट्ठामि। ता किं तक्केरकाए[2] कहाए। णं एदेण एव्व पक्खवादेण एत्तिअं भूमिं णीदम्हि। (इति रोदिति।)

साङ्कृत्यायनी—अलं राजपुत्रि रुदितेन। नेदृशो वत्सराजः। (विलोक्य।) अथवा प्राप्त एवायम्। यस्ते मन्युप्रमार्जनं करोति।

वासवदत्ता— मैणोरहा[3] दाणिं एदे भअवदीए।

(ततः प्रविशति राजा विदूषकश्च।)

राजा—वयस्य। क इदानीमभ्युपायः प्रियां मोचयितुम्।

विदूषकः— भो[3] वअस्स। मुञ्च विसादं। अहं दे उवाअं कहइस्सं।

राजा—(सहर्षम्।) वयस्य। त्वरिततरमभिधीयताम्।

विदूषकः—भो[4]। तुमं दाव अणेअसमरसंघट्टप्पहावबाहुसाली। पुणो वि अणेअगअतुरअपआइकदुव्विसहबळसमुदिदो। ता सव्वबळसंदोहेण अन्तेउरं सुपीडिअं करिअ दाणिं एव्व आरण्णिअं मोचावेहि।

---

१ भगवति। एतदत्र सत्यम्। तथा हासितास्मि येन भगवत्याः पुरतो लज्जया कथमपि तिष्ठामि। तत्किं तदीयया कथया। नन्वेतेनैव पक्षपातेनैतावतीं भूमिं नीतास्मि।

२ मनोरथा इदानीमेते भगवत्याः।

३ भो वयस्य। मुञ्च विषादम्। अहं त उपायं कथयिष्यामि।

४ भोः। त्वं तावदनेकसमरसंघट्टप्रभावबाहुशालो। पुनरप्यनेकगजतुरगपदातिदुर्विषहबलसमुदितः। तत्सर्वबलसंदोहेनान्तःपुरं सुपीडितं कृत्वेदानीमेवारण्यकां मोचयाव।

Digitized by Google

राजा— वयस्य । अशक्यमुपदिष्टम् ।

विदूषकः— किं[1] एत्थ असक्कं । जदो दाव कुज्जवामणबुड्ढकञ्चुइवज्जिदो मणुस्सो अवरो णत्थि तहिं ।

राजा— (सावज्ञम् ।) मूर्ख । किमसंबद्धं प्रलपसि । देव्याः प्रसादं मुक्त्वा नान्यस्तस्या मोक्षणाभ्युपायः । तत्कथय कथं देवीं प्रसादयामि ।

विदूषकः— भो[2] । मासोववासं करिअ जीविदं धारेहि । एव्वं देवी चण्डी पसीदिस्सदि ।

राजा— (विहस्य ।) अलं परिहासेन । कथय कथं देवीं प्रसादयामि ।

धृष्टः किं पुरतोऽवरुध्य विहसन्गृह्णामि कण्ठे प्रियां
किं वा चाटुशतप्रपञ्चरचनाप्रीतां करिष्यामि ताम् ।
किं तिष्ठामि कृताञ्जलिर्निपतितो देव्याः पुरः पादयोः
सत्यं सत्यमहो न वेद्म्यनुनयो देव्याः कथं स्यादिति॥१॥

तदेहि । देवीसकाशमेव गच्छावः ।

विदूषकः—भो[3] । गच्छ तुमं । अहं उण दाणिं एव्व बन्धणादो कहं वि परिब्भंसिअ आअदोम्हि । ता ण गमिस्सं ।

राजा— (विहस्य कण्ठे गृहीत्वा बलान्निवर्तयति ।) मूर्ख । आगम्यतामागम्यताम् । (परिक्रम्यावलोक्य च ।) इयं देवी दन्तवलभीमध्यमध्यास्ते । यावदुपसर्पामि । (सलज्जमुपसर्पति ।)

---

१ किमत्राशक्यम् । यतस्तावत्कुब्जवामनवृद्धकञ्चुकिवर्जितो मनुष्योऽपरो नास्ति तत्र ।

२ भोः । मासोपवासं कृत्वा जीवितं धारय । एवं देवी चण्डी प्रसत्स्यति ।

३ भोः । गच्छ त्वम् । अहं पुनरिदानीमेव बन्धनात्कथमपि परिभ्रश्यागतोऽस्मि । तन्न गमिष्यामि ।

Digitized by Google

(वासवदत्ता सखेदमासनादुत्तिष्ठति ।)

राजा—

किं मुक्तमासनमलं मयि संभ्रमेण
नोत्थातुमित्थमुचितं मम तान्तमध्ये ।
दृष्टिप्रसादविधिमात्रहृतो जनोऽय-
मत्यादरेण किमिति क्रियते विलक्षः ॥२॥

वासवदत्ता— (मुखं निरूप्य ।) अज्जउत्त । विलक्खो दाणिं तुमं होसि[1] ।

राजा—प्रिये । सत्यमहं विलक्षः । यत्प्रत्यक्षदृष्टाप्रराधोऽपि भवतीं प्रसादयितुं व्यवसितोऽस्मि ।

साङ्कृत्यायनी—(आसनं निर्दिश्य ।) महाराज । क्रियतामासनपरिग्रहः ।

राजा— (आसनं निर्दिश्य ।) इत इतो देव्युपविशतु ।

(वासवदत्ता भूमावुपविशति ।)

राजा—आः । कथं भूमावुपविष्टा देवी । अहमप्यत्रैवोपविशामि । (इति भूमावुपविश्य कृताञ्जलिः ।) प्रिये । प्रसीद प्रसीद । किमेवं प्रणतेऽपि मयि गम्भीरतरं कोपमुद्वहसि ।

भ्रूभङ्गं न करोषि रोदिषि मुहुर्मुग्धेक्षणे केवलं
नातिप्रस्फुरिताधरानवरतं निःश्वासमेवोज्झसि ।
वाचं नापि ददासि तिष्ठसि परं प्रध्याननम्राननो
कोपस्ते स्तिमितो निपीडयति मां गूढप्रहारोपमः ॥३॥
प्रिये । प्रसीद प्रसीद । (इति पादयोः पतति ।)

वासवदत्ता— अंदिसुहिदो णं सि[2] । किं दाणिं दुक्खिदं जणं विआरेसि । उट्ठेहि । को एत्थ कुविदो ।

---

१ आर्यपुत्र । विलक्ष इदानीं त्वं भवसि ।

२ अतिसुखितो नन्वसि । किमिदानीं दुःखितं जनं विकारयसि । उत्तिष्ठ । कोऽत्र कुपितः ।

Digitized by Google

साङ्कृत्यायनी— उत्तिष्ठ महाराज । किमनेन ।
न्यदेव तावदुद्वेगकारणमस्याः ।

राजा— (ससंभ्रमम् ।) भगवति । किमन्यत् ।

(साङ्कृत्यायनी कर्णे कथयति ।)

राजा— (विहस्य ।) यद्येवमलमुद्वेगेन । मयापि ज्ञातम् । सिद्ध एवास्मिन्प्रयोजने देवीं तु दिष्ट्या वर्धयिष्यामीति नोक्तम् । अन्यथा कथमहं दृढवर्मवृत्तान्ते विस्रब्धस्तिष्ठामि । तत्कतिपयान्यहानि तद्वार्तामा श्रागतायाः । दं च तत्र वर्तते ।

अस्मद्बलैर्विजयसेनपुरःसरैस्तै-
राक्रान्तबाह्यविषयो विहतप्रतापः ।
दुर्गं कलिङ्गहतकः सहसा प्रविश्य
प्राकारमात्रशरणोऽशरणः कृतोऽसौ ॥ ४ ॥

दवस्थं च तं
र्दिष्टाक्रान्तमन्दं प्रतिदिनविरमद्वीरदासेरवृत्तं
सध्वंसं शीर्यमाणद्विपतुरगनरक्षीणनिःशेषसैन्यम् ।
द्य श्वो वा विभग्ने झटिति मम बलैः सर्वतस्तत्र दुर्गे
बद्धं युद्धे हतं वा भगवति न चिराच्छ्रोष्यसि त्वं कलिङ्गम्[१]

साङ्कृत्यायनी— राजपुत्रि । प्रथमतरमेव भवत्याः थितं मया कथमप्रतिविधाय वत्सराजः स्थास्यतीति ।

वासवत्ता— जई एव्वं पिअं मे ।

(प्रविश्य प्रतीहारी ।)

प्रतीहारी— जेदु जेदु भट्टा । एसो क्खु विअअ-

---

१ यद्येवं प्रियं मे ।

२ जयतु जयतु भर्ता । एष खलु विजयसेनो दृढवर्मकञ्चुकिसहितो पसमुत्फुल्ललोचनः प्रियं निवेदयितुकामो द्वारे तिष्ठति ।

Digitized by Google

सेणो दिढवम्मकञ्चुईसहिदो हरिससमुप्फुल्ललोअणो पिअं णिवेदिदुकामो दुवारे चिट्ठइ ।

वासवदत्ता— (सस्मितम् ।) भअवदि[1] । जह तक्केमि परिदोसिदम्हि अज्जउत्तेणेत्ति[2] ।

साङ्कृत्यायनी— वत्सराजपक्षपातिनी खल्वहं न किंचिदपि ब्रवीमि ।

राजा— शीघ्रं प्रवेशय तौ ।

प्रतीहारी— तह[3] । (इति निष्क्रान्ता ।)

(ततः प्रविशति विजयसेनः कञ्चुकी च ।)

विजयसेनः—भोः कञ्चुकिन् । अद्य स्वामिपादा द्रष्टव्या इति यत्सत्यमनुपमं कमपि सुखातिशयमनुभवामि ।

कञ्चुकी— विजयसेन । अवितथमेतत् । पश्य ।

सुखनिर्भरोऽन्यथापि स्वामिनमवलोक्य भवति भृत्यजनः ।
किं पुनररिबलविघटननिर्व्यूढप्रभुनियोगभरः ॥ ६ ॥

उभौ— (उपसृत्य ।) जयतु जयतु स्वामी ।

(राजा उभावपि परिष्वजते ।)

कञ्चुकी— देव । दिष्ट्या वर्धसे ।

हत्वा कलिङ्गहतकमस्मत्स्वामिनि निवेशिते राज्ये ।
देवस्य समादेशोऽवस्थापितो विजयसेनेन ॥ ७ ॥

वासवदत्ता— अइ[3] भअवइ । अहिजाणासि एदं कञ्चुइं ।

साङ्कृत्यायनी— कथं नाभिजानामि । ननु स एष यस्य हस्ते मातृष्वसा ते पत्रिकामनुप्रेषितवती ।

राजा—साधु । विजयसेनेन महाव्यापारोऽनुष्ठितः ।

---

१ भगवति । यथा तर्कयामि परितोषितास्म्यार्यपुत्रेणेति ।
२ तथा ।
३ अयि भगवति । अभिजानास्येतं कञ्चुकिनम् ।

Digitized by Google

(विजयसेनः पादयोः पतति ।)

राजा—देवि । दिष्ट्या वर्धसे । प्रतिष्ठितो राज्ये दृढवर्मा ।

वासवदत्ता— (सहर्षम् ।) [1]अणुग्गहिदम्हि ।

विदूषकः— [2]ईरिसे अब्भुदए अस्सिं राअउले एदं करणिज्जं । (राजानं निर्दिश्य वीणावादनं नाटयन् ।) गुरुपूआ । (आत्मनो यज्ञोपवीतं दर्शयन् ।) बम्हणस्स सक्कारो । (आरण्यकां सूचयन् ।) सव्वबन्धणमोक्खोत्ति ।

राजा—(वासवदत्तामपवार्य चेटिकां ददत् ।) साधु वयस्य साधु ।

विदूषकः—[3]होदि । कहं तुमं ण किं वि एत्थ समादेसस्सि ।

वासवदत्ता— (साङ्कृत्यायनीमवलोक्य सस्मितम् ।) [4]मोइदा क्खु हदासेण आरण्णिआ ।

साङ्कृत्यायनी— किं वा तपस्विन्यानया बद्धया ।

वासवदत्ता— [5]जेह भअवदीए रोअदि ।

साङ्कृत्यायनी— यद्येवमहमेव गत्वा तां मोचयिष्यामि । (इति निष्क्रान्ता ।)

कञ्चुकी— इदमपरं संदिष्टं महाराजेन दृढवर्मणा । त्वत्प्रसादात्सर्वमेव यथाभिलषितं संपन्नम् । तदेते प्राणास्त्वदीयाः । यथेष्टमिमान्विनियोक्तुं त्वमेव प्रमाणमिति ।

---

१ अनुगृहीतास्मि ।

२ ईदृशेऽभ्युदयेऽस्मिन्राजकुल एतत्करणीयम् । गुरुपूजा । ब्राह्मणस्य सत्कारः । सर्वबन्धनमोक्ष इति ।

३ भवति । कथं त्वं न किमप्यत्र समादिशसि ।

४ मोचिता खलु हताशेनारण्यका ।

५ यथा भगवत्यै रोचते ।

Digitized by Google

(राजा सलज्जमधोमुखस्तिष्ठति ।)

विजयसेनः—देव । न शक्यमेव देवं प्रति प्रीतिवि
शेषं दृढवर्मणः कथयितुम् ।

कञ्चुकी— यद्यपि तुभ्यं प्रतिपादितायाः प्रियदर्शि-
5 काया अस्मद्दुहितुः परिभ्रंशान्न मे संबन्धो जात इति
दुःखमासीत्तथापि वासवदत्तायाः परिणेत्रापि त्वया तदप-
नीतमेव ।

वासवदत्ता— (सास्रम ।) अज्जकञ्चुई । कहं मे
भइणी परिब्भट्ठा ।

10 **कञ्चुकी**—राजपुत्रि । तस्मिन्कलिङ्गहतकावस्कन्दे वि-
द्रुतेष्वितस्ततोऽन्तःपुरजनेषु दिष्ट्या दृष्टामिदानीं न यु-
क्तमत्र स्थातुमिति तामहं गृहीत्वा वत्सराजान्तिकं प्र-
स्थितः । ततः संचिन्त्य तां विन्ध्यकेतोर्हस्ते निक्षिप्य नि-
र्गतोऽस्मि । यावत्प्रतीपमागच्छामि तावत्कैरपि तत्स्थानं
15 सह विन्ध्यकेतुना स्मर्तव्यतां नीतम् ।

राजा— (सस्मितम् ।) विजयसेन । किं कथयसि ।

कञ्चुकी— तत्र चान्विष्यता मया न प्राप्ता । तदा-
प्रभृति नाद्यापि विज्ञायते क्व वर्तत इति ।

(प्रविश्य मनोरमा ।)

20 **मनोरमा**—भट्टिणी[1] । पाणसंसए वट्टइ सा तवस्सिणी[2] ।

वासवदत्ता— (सास्रम ।) किं[3] उण तुमं पिअदं-
सणाउत्तन्तं जाणासि ।

मनोरमा—णं[4] हु अहं पिअदंसणाउत्तन्तं जाणामि

---

१ आर्यकञ्चुकिन् । कथं मे भगिनी परिभ्रष्टा ।
२ भट्टिनि । प्राणसंशये वर्तते सा तपस्विनी ।
३ किं पुनस्त्वं प्रियदर्शनावृत्तान्तं जानासि ।
४ न खल्वहं प्रियदर्शनावृत्तान्तं जानामि । एषा खल्वारण्यका म

Digitized by Google

[स]ा क्खु आरण्णिआ कल्लव्वपदेसेण आणीदं विसं पा-
[अ] पाणसंसए वट्टदित्ति एव्वं मए णिवेदिदं । ता परित्ता-
[भ]दु भट्टिणी । (रुदती पादयोः पतति ।)

वासवदत्ता— (स्वगतम् ।) हद्धि[1] हद्धि । पिअदं-
[स]णादुक्खं वि मे अन्तरिदं आरण्णिआउत्तन्तेण । अदि- 5
[दु]ज्जणो क्खु लोओ । कदाइ मं अण्णहा संभावइस्सदि ।
[ता] एदं एत्थ जुत्तं । (प्रकाशं ससंभ्रमम् ।) मणोरमे । लहुअ
[ग]ह एव्व आणेहि तं । णाअलोआदो गहिदविसविज्जो अ-
[ज्ज]उत्तो एत्थ कुसलो ।

(निष्क्रान्ता मनोरमा । ततः प्रविशति मनोरमया 10
धृता सविषवेगमात्मानं नाटयन्त्यारण्यका ।)

आरण्यका— हला[2] मणोरमे । कीस दाणिं मं अ-
न्धआरं पवेसेसि ।

मनोरमा—(सविषादम् ।) हद्धि[3] हद्धि । दिट्ठि वि से
संक्रन्ता विसेणेव्व । (वासवदत्तां दृष्ट्वा ।) भट्टिणि । लहु परि- 15
त्ताएहि लहु परित्ताएहि । गुरुईभूदं से विसं ।

वासवदत्ता— (ससंभ्रमं राजानं हस्ते गृहीत्वा ।) अ[4]-

व्यपदेशेनानीतं विषं पीत्वा प्राणसंशये वर्तत इत्येवं मया निवेदितम् । त-
त्परित्रायतां भट्टिनी ।

१ हा धिक् हा धिक् । प्रियंदर्शनादुःखमपि मेऽन्तरितमारण्यकावृत्ता-
न्तेन । अतिदुर्जनः खलु लोकः । कदाचिन्मामन्यथा संभावयिष्यति । तदेतदत्र युक्तम् । मनोरमे । लब्धिर्हैवानय ताम् । नागलोकाद्गृहीतविषविद्य आर्यपुत्रोऽत्र कुशलः ।

२ हला मनोरमे । कस्मादिदानीं मामन्धकारं प्रवेशयसि ।

३ हा धिक् हा धिक् । दृष्टिरप्यस्याः संक्रान्ता विषेणैव । भट्टिनि । लघु परित्रायस्व लघु परित्रायस्व । गुरुभूतमस्या विषम् ।

४ आर्यपुत्र । उत्तिष्ठोत्तिष्ठ । लघु विपद्यते खल्वेषा तपस्विनी ।

Digitized by Google

ज्जउत्त । उट्ठेहि उट्ठेहि । लहु विवज्जइ क्खु एसा तवस्सिणी । (सर्वे पश्यन्ति ।)

कञ्चुकी—(विलोक्य ।) सुसदृशी खल्वियं मम राजपुत्र्याः प्रियदर्शनायाः । (वासवदत्तां निर्दिश्य ।) राजपुत्रि । कुत इयं कन्यका ।

वासवदत्ता— अज्जअ । विन्झकेउणो दुहिदा । तं वावादिअ विजयसेणेण आणीदा ।

कञ्चुकी—कुतस्तस्य दुहिता । सैवेयं मम राजपुत्री । हा हतोऽस्मि मन्दभाग्यः । (इति निपत्य भूमावुत्थाय ।) राजपुत्रि । इयं सा प्रियदर्शिका भगिनी ते ।

वासवदत्ता—अज्जउत्त[1] । परित्ताएहि परित्ताएहि । मम भइणी विवज्जइ ।

राजा— समाश्वसिहि समाश्वसिहि । पश्यामस्तावत् । कष्टं भोः कष्टम् ।

संजातसान्द्रमकरन्दरसां क्रमेण
पातुं गतश्च कलिकां कमलस्य भृङ्गः ।
दग्धा निपत्य सहसैव हिमेन चैषा
वामे विधौ न हि फलन्त्यभिवाञ्छितानि ॥८॥

मनोरमे । पृच्छ्यतां तावत्किं ते बोध इति ।

मनोरमा—सहि[2] । किं दे बोधो । (साश्रु पुनश्चालयन्ती ।) सहि । णं भणामि किं दे बोधोत्ति ।

प्रियदर्शिका— (अविस्पष्टम् ।) जं[3] एदाए वि ण मए महाराओ दिट्ठो— (इत्यर्धोक्ते भूमौ पतति ।)

---

१ आर्ये । विन्ध्यकेतोर्दुहिता । तं व्यापाद्य विजयसेनेनानीता ।
२ आर्यपुत्र । परित्रायस्व परित्रायस्व । मम भगिनी विपद्यते ।
३ सखि । किं ते बोधः । सखि । ननु भणामि किं ते बोध इति ।
४ यदेतयापि न मया महाराजो दृष्टः ।

Digitized by Google

राजा— (साश्रम् ।)

एषा मीलयतीदमीक्षणयुगं जाता ममान्धा दिशः
कण्ठोऽस्याः प्रतिरुध्यते मम गिरो निर्यान्ति कृच्छ्रादिमाः ।
एतस्याः श्वसितं हृतं मम तनुर्निश्चेष्टतामागता
मन्येऽस्या विषवेग एव हि परं सर्वं तु दुःखं मम ॥९॥

वासवदत्ता—(साश्रम् ।) पिअदंसणे[1] । उट्ठेहि उट्ठेहि । पेक्ख एसो महाराओ चिट्ठइ । कहं वेअणा वि से णट्ठा । किं दाणिं मए अवरज्झं अआणन्तीए जेण कुविदा णालवसि । ता पसीद पसीद । उट्ठेहि उट्ठेहि । ण हु पुणो अवरज्झिस्सं । (ऊर्ध्वमवलोक्य ।) हा देव्वहदअ । किं दाणिं मए अवकिदं जेण एदावत्थं गदा मे भइणी आदंसिदा । (प्रियदर्शिकाया उपरि पतति ।)

विदूषकः—भो[2] वअस्स । कहं तुमं मूढो विअ चिट्ठसि । ण एसो विसादस्स कालो । विसमा क्खु गई विसस्स । ता दंसेहि अप्पणो विज्जापहावं ।

राजा— सत्यमेवैतत् । (प्रियदर्शिकामालोक्य ।) मूढ एवाहमेतावतीं वेलाम् । तदहमेनां जीवयामि । सलिलं सलिलम् ।

विदूषकः— (निष्क्रम्य पुनः प्रविश्य ।) भो[3] । एदं सलिलम् ।

---

१ प्रियदर्शने । उत्तिष्ठोत्तिष्ठ । पश्यैष महाराजस्तिष्ठति । कथं वेदनाप्यस्या नष्टा । किमिदानीं मयापराद्धमजानन्त्या येन कुपिता नालपसि । तत्प्रसीद प्रसीद । उत्तिष्ठोत्तिष्ठ । न खलु पुनरपरात्स्यामि । हा दैवहतक । किमिदानीं मयापकृतं येनैतदवस्थां गता मे भगिन्यादर्शिता ।

२ भो वयस्य । कथं त्वं मूढ इव तिष्ठसि । नैष विषादस्य कालः । विषमा खलु गतिर्विषस्य । तद्दर्शयात्मनो विद्याप्रभावम् ।

३ भोः । एतत्सलिलम् ।

Digitized by Google

(राजोपसृत्य प्रियदर्शनाया उपरि हस्तं निधाय मन्त्रस्मरणं नाटयति । प्रियदर्शिका शनैरुत्तिष्ठति ।)

वासवदत्ता—अज्जउत्त[1]। दिट्ठिआ पच्चुज्जीविदा मे भइणी ।

विजयसेनः— अहो देवस्य विद्याप्रभावः ।

कञ्चुकी— अहो सर्वत्राप्रतिहता नरेन्द्रता देवस्य ।

प्रियदर्शिका— (शनैरुत्थायोपविश्य च जृम्भिकां नाटयन्ती सविषादमविस्पष्टम् ।) मणोरमे[2]। चिरं खु सुत्तह्मि ।

विदूषकः— भो[3] वअस्स। णिव्यूढं दे वोदित्तणं ।

(प्रियदर्शिका साभिलाषं राजानं निरूप्य सलज्जं किंचिदधोमुखी तिष्ठति ।)

वासवदत्ता—(सहर्षम् ।) अज्जउत्त[4] । किं दाणिं वि एसा अण्णहेव्व करेदि ।

राजा— (सस्मितम् ।)

स्वभावस्था दृष्टिर्न भवति गिरा नातिविशदा
तनुः सीदत्येषा प्रकटपुलकस्वेदकणिका ।
यथा चायं कम्पः स्तनभरपरिक्लेशजनन-
स्तथा नाद्याप्यस्या नियतमखिलं शाम्यति विषम्॥१०॥

कञ्चुकी— (प्रियदर्शिकां निर्दिश्य ।) राजपुत्रि । एष ते पितुराज्ञाकरः । (इति पादयोः पतति ।)

प्रियदर्शिका— (विलोक्य ।) कहं कञ्चुई[5] अज्जविणअवसू । (साश्रम् ।) हा ताद । हा अज्जूए ।

---

१ आर्यपुत्र । दिष्ट्या प्रत्युज्जीविता मे भगिनी ।
२ मनोरमे । चिरं खलु सुप्तास्मि ।
३ भो वयस्य । निर्व्यूढं ते वैद्यत्वम् ।
४ आर्यपुत्र । किमिदानीमप्येषान्यथैव करोति ।
५ कथं कञ्चुक्यार्यविनयवसुः । हा तात । हा मातः ।

Digitized by Google

कञ्चुकी— राजपुत्रि । अलं रुदितेन । कुशलिनौ ते पितरौ । वत्सराजप्रभावात्पुनस्तदवस्थमेव राज्यम् ।

वासवदत्ता— (सास्रम् ।) एहि[1] अलिअसीले । दाणिं वि दे भइणिआसिणेहं दंसेहि । (कण्ठे गृहीत्वा ।) दाणिं समस्सत्थम्मि । 5

विदूषकः— होदि[2] । तुमं भइणिं गहिअ कण्ठे एव्वं परितुट्ठासि । वोदिअस्स पारिदोसिअं विसुमरिदं ।

वासवदत्ता— वसन्तअ[3] । ण विसुमरिदं ।

विदूषकः—(राजानं निर्दिश्य सस्मितम् ।) वोदिअ[4] । पसारेहि हत्थं । भइणीए अग्गहत्थं दे पारिदोसिअं दाविस्सं । 10

(राजा हस्तं प्रसारयति ।)
(वासवदत्ता प्रियदर्शिकाहस्तमर्पयति ।)

राजा— (हस्तमुपसंहृत्य ।) किमनया । संप्रत्येव कथमपि प्रसादितासि । 15

वासवदत्ता— कीं[5] तुमं अगण्हिदुं । पुढमं एव्व तादेण इअं दिण्णा ।

विदूषकः— भो[6] । माणणीआ क्खु देवी । मा से पडिउलं करेहि ।

---

१ एह्यलीकशीले । इदानीमपि ते भगिनीस्नेहं दर्शय । इदानीं समाश्वसितास्मि ।

२ भवति । त्वं भगिनीं गृहीत्वा कण्ठ एवं परितुष्यसि । वैद्यस्य पारितोषिकं विस्मृतम् ।

३ वसन्तक । न विस्मृतम् ।

४ वैद्य । प्रसारय हस्तम् । भगिन्या अग्रहस्तं ते पारितोषिकं दापयिष्यामि ।

५ कस्त्वमग्रहीतुम् । प्रथममेव तातेनेयं दत्ता ।

६ भोः । माननीया खलु देवी । मास्याः प्रतिकूलं कुरु ।

Digitized by Google

(वासवदत्ता राज्ञो हस्तं बलादाकृष्य प्रियदर्शिकामर्पयति ।)

राजा— (सस्मितम् ।) देवी प्रभवति । कुतोऽस्माकमन्यथा कर्तुं विभवः ।

वासवदत्ता—अज्जउत्त[1]। अदो वि परं किं दे पिअं करीअदु ।

राजा— किमतःपरं प्रियम् । पश्य ।

निःशेषं दृढवर्मणा पुनरपि स्वं राज्यमध्यासितं
त्वं कोपेन सुदूरमप्यपहृता सद्यः प्रसन्ना मम ।
जीवन्ती प्रियदर्शना च भगिनी भूयस्त्वया संगता
किं तत्स्यादपरं प्रियं प्रियतमे यत्सांप्रतं प्रार्थ्यते ॥११॥

तथापीदमस्तु ।

(भरतवाक्यम् ।)

उर्वीमुद्दामसस्यां जनयतु विसृजन्वासवो वृष्टिमिष्टा-
मिष्टैस्त्वैविष्टपानां विदधतु विधिवत्प्रीणनं विप्रमुख्याः ।
आकल्पान्तं च भूयात्स्थिरसमुपचिता संगतिः सज्जनानां
निःशेषं यान्तु शान्तिं पिशुनजनगिरो दुःसहा वज्रलेपाः ॥१२

(इति निष्क्रान्ताः सर्वे ।)

इति चतुर्थोऽङ्कः

समाप्तेयं प्रियदर्शिका नाम नाटिका ।

---

१ आर्यपुत्र । अतोऽपि परं किं ते प्रियं क्रियताम् ।

Digitized by Google

APPENDIX A.

—o—

NOTES.

प्रियदर्शिका—This name is given to the play because this is the heroine's name. The Ratnâvalî is also similarly named. This like the Ratnâvalî is a Nâtikâ which is defined thus :—

"नाटिका कृत्तवृत्ता स्यात्स्त्रीप्राया चतुरङ्किका ।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः ॥
स्यादन्तःपुरसंबद्धा संगीतव्यापृताथवा ।
नवानुरागा कन्यात्र नायिका नृपवंशजा ॥
संप्रवर्तेत नेतास्यां देव्यास्त्रासेन शङ्कितः ।
देवी पुनर्भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा ॥
पदे पदे मानवती तद्वशः संगमो द्वयोः ।
वृत्तिः स्यात्कौशिकी स्वल्पविमर्षाः संधयः पुनः ॥" इति
साहित्यदर्पणे ६ परिच्छेदे ५३९ कारिकायाम्.

P. 1. L. 1. प्रस्तावना— It is thus defined :—

"नटी विदूषको वापि पारिपार्श्वक एव वा ।
सूत्रधारेण सहिताः संलापं यत्र कुर्वते ॥
चित्रैर्वाक्यैः स्वकार्योत्थैः प्रस्तुताक्षेपिभिर्मिथः ।
आमुखं तत्तु विज्ञेयं नाम्ना प्रस्तावनापि सा ॥" इति
सा० द० ६ परि० २८७ का०

„ L. 2. It is a curious circumstance that the author, (real or reputed) of this play addresses his benedictory stanzas in this and the Ratnâvalî to S'iva, Gaurî and other Hindu deities; while in his third play the Nâgânanda there is an invocation to Buddha Jina. The author also betrays his Buddhistic inclinations when he makes Garuda say in the fifth act of that play:—

"किं बहुना बोधिसत्व एवायं मया व्यापादितः। तदस्य महापातकस्याग्निप्रवेशादते नान्यत्प्रायश्चित्तं पश्यामि" &c.

„ L. 2–5. This verse describes the scene where S'iva and Pârvatî were married, and the marriage rites performed in the presence of the sacred fire kindled, the God Brahmâ acting as Purohita to join their hands.

Digitized by Google

P. 1. L. 2. धूमव्याकुलदृष्टि— An adjective qualifying गौरी. Whose eyes were pained on account of the smoke issuing from the Fire witnessing the espousals. इन्दुकिरणैः—It is to be borne in mind that इन्दु or इन्दुकला was always present on the head of S'iva.

„ L. 3. उत्सुका— A bride gets the first sight of her husband at the time of the होम after the removal of the screen between the bride and the bride-groom when the Mangalâshtaka verses are over. It is natural therefore for the bride to be impatient (उत्सुका) to see what sort of a man has fallen to her lot, the same being true of गौरी. आनतमुखी—Hanging her head down. ब्रह्मणः— The God Brahmâ acting as Purohita.

„ L. 4. सेर्ष्यं—With jealousy, jealous. पादनखेन्दु &c.—When she hung her head and looked down she saw in the (bright) nails of her feet, as if in a mirror, the reflection of हर who had the Ganges (गङ्गा) on his head. This made her jealous, because a thought crossed her mind that she had a सपत्नी (co-wife).

„ L. 5. उत्पुलका— Horripilated. This is known as सात्विक-भाव. करग्रह— The holding of the hand, marriage.

„ L. 7. कैलासाद्रौ &c. This verse refers to the time when Râvaṇa went to and shook the mountain Kailâsa. All the constructions in this verse are Loc. absolute constructions. उदस्त— Thrown up, lifted up, poised in the air. गणेषु— It is very well known that the God S'iva is attended by several Gaṇas headed by प्रमथ. उल्लसत्कौतुकेषु— Whose curiosity was roused, they not knowing the cause of the mountain's rocking.

„ L. 8. क्रोडम्— The thigh, lap. कुमार— The son, Kârtikeya. विषमुक्— The serpent on the body of S'iva.

„ L. 9. पादावष्टम्भसीदद्वपुषि— Whose form was sinking, whose strength was failing, when he tried to stand firmly on his legs with the heavy load of the Kailâsa in his arms. दशमुख— Ten-mouthed, Râvaṇa. पाताल-मूलम्— (Going down) to the surface of the पाताल, the regions under the earth and the abode of the Nâgas or serpents.

„ L. 10 क्रुद्धः— Angry to see that his mountain was tossed

Digitized by Google

up. भयघनम्— An adverb. Closely on account of fear.

P. 1. L. 11. नान्द्यन्ते— After the benediction. नान्दी is defined thus:—

" आशीर्वचनसंयुक्ता नित्यं यस्मात्प्रयुज्यते ।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ॥ " इति

सा० द० ६ प० २८२ का०

„ L. 12. सूत्रधारः— The chief actor, stage manager.

" नाट्योपकरणादीनि सूत्रमित्यभिधीयते ।
सूत्रं धारयतीत्यस्मात्सूत्रधारो मतो बुधैः ॥ " इति

वसन्तोत्सव— The vernal festival commencing from the month of माघ and lasting for about two months. The passage अद्याहं &c. is the same or much the same in all the three plays of the author. The Nâgânanda has इन्द्रोत्सवे instead of वसन्तोत्सवे.

„ L. 15. अपूर्व— Extraordinary, uncommon, rare. वस्तु—Plot. रचना— Arrangement, style.

„ L. 16. श्रोत्रपरंपरया— From one ear to another, by hearsay. प्रयोग— Performance on the stage.

„ L. 18. यथावत्— As it stands, in toto, in its entirety &c.

„ L. 19. नेपथ्य— This word includes many things, such as dresses, parts to be assigned to the several actors and other sundry directions and instructions given by the सूत्रधार.

„ L. 20. आवर्जितानि— Drawn, attracted. सामाजिक.— The audience, men forming the audience.

P. 2. L. 1. श्रीहर्षो &c.— The same verse finds place in the Ratnâvali and the Nâgânanda, except that in the second line in the latter, there is a substitution of 'सिद्धराजचरितं' and in some editions 'लोकानन्दि च बोधिसत्वचरितं'. परिषद्— Assembly, audience. गुणग्राहिणी— Appreciator or receiver of merit.

„ L. 2. हारि— Attractive, interesting. वयम्— आदरार्थे. Used for the singular out of respect.

„ L. 4. भाग्योपचय— Goodness of fortune.

„ L. 5. नेपथ्य— The word is here used in the sense of a curtain or screen that separates the room behind the stage from the stage itself. अभ्युद्यत—Engaged, ready.

Digitized by Google

P. 2. L. 6. अङ्गाधिपति— The King of the Angas, a country in the neighbourhood of Bhagalpore. कञ्चुकी— A chamberlain. भूमिका— Part.

,, L. 10 विष्कम्भकः— A prelude which is thus defined:—

"वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः ।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥" इति
सा० द० ६ प० ३०८ का०

,, L. 16 कटुनिष्फला— This may be construed as कटु अतएव निष्फला, or the word कटु may be taken as a separate word qualifying फलम् in the next line.

,, L. 17. चिरजीविता— Long life.

,, L. 18. तादृश— Of that kind. अप्रतिहत— Whose शक्तित्रय was not withstood. The three S'aktis or powers of a king being प्रभुशक्ति, मन्त्रशक्ति and उत्साहशक्ति. The first is the strength of forces and treasure, the second consists of wise and good counsellors, and the third being of mere personal valour and activity &c.

,, ,, नाम प्राकाश्ये— Celebrated, well-known. "नाम प्राकाश्यसंभाव्यक्रोधोपगमकुत्सने" इत्यमरः; "नाम कोपेऽभ्युपगमे विस्मये स्मरणेऽपि च । संभाव्यकुत्साप्राकाश्यविकल्पेष्वपि दृश्यते" इति मेदिन्यपि.

,, L. 19. रघुदिलीप &c.— All these three are well-known. रघु was the son of दिलीप of the solar race. नल was the king of the Nishadhas. प्रार्थ्यमाना— Courted, solicited, asked in marriarge.

,, L. 20 वत्सराजस्य— The dative would be more proper. अनुशय— Resentment.

,, L. 21. बन्धनान्न निवर्तते &c.— King Vatsa the hero of this play or as he is popularly called Udayana was a prisoner of प्रद्योत. Thence he made his escape carrying away his daughter वासवदत्ता as he himself says further on at P. 4 L. 17 & 18. 'धिङ्मूर्ख । न खलु सर्वो वत्सराजः । य एवं वासवदत्तामवाप्य बन्धनान्निर्यास्यति।' This is even corroborated by the Kanchuki who says at P. 3. L. 8 & 9. 'अये । एवं श्रुतं मया । बन्धनात्परिभ्रष्टः प्रद्योतितनयामपहृत्य वत्सराजः कौशाम्बीमागत इति' From these quotations as well as from the verse 7 on P. 4 it is clear that the author takes Vâsavadattâ to be

Digitized by Google

the daughter of प्रद्योत whose prisoner Vatsa was. But according to the Kathâsaritsâgara वासवदत्ता was not the daughter of प्रद्योत but of महासेन, king of उज्जयिनी, Vatsa's second wife पद्मावती being the daughter of प्रद्योत, king of मगध. The incident of Vatsa's imprisonment is very curious. We give it here briefly from the Kathâsaritsâgara. Lambaka II Tarangas 11 & 12:—

"King Udayana (वत्स) entrusted the affairs of government to his ministers Yaugandharâyaṇa and others and "स बभूव शनै राजा सुखेष्वेकान्ततत्परः। सदा सिषेवे मृगयां वीणां घोषवतीं च ताम् ॥ दत्तां वासुकिना पूर्वं नक्तं-दिनमवादयत् ॥ "&c. Mahâsena, though an enemy of Udayana, wished to give his daughter Vâsavadattâ in marriage to him, but doubting if he would accept her, he thought of the following expedient for bringing about the union. Seeing that Udayana spent his days and nights in the forests he thought of making him a prisoner, and with this view he caused a wooden elephant to be made and concealed some armed men in it. It was then placed in the forest. When Udayana came across it, the armed men came out and seeing him alone, seized and made him a prisoner. He was then brought before Mahâsena who gave his daughter Vâsavadattâ in his charge and told him that he would be set at liberty when he gave his daughter instructions and training in music (गन्धर्वविद्या). He then fled from the prison with Vâsavadattâ who was ultimately given to him in marriage with honor".

In act III. of this very play at the beginning of the गर्भनाटक (P. 29. L. 8 & 9.) the author mentions वासवदत्ता as राजपुत्री and महासेन (P. 28. L. 19.) as the राजा. Then again at the beginning of act IV. (P. 42. L. 3.) अङ्गारवती is mentioned as the mother of वासवदत्ता, and according to the authority quoted above अङ्गारवती was the wife of महासेन. In the face of this internal evidence and the authority of the Kathâsaritsâgara, it is difficult to understand how the author states Vâsavadattâ to be the daughter of प्रद्योत.

Digitized by Google

लब्धरन्ध्र— One who has got a weak point, and has availed himself of the opportunity thus presented to him.

P. 2. L. 22. कलिङ्गहतक—That wretch of a कलिङ्ग (king of Kalinga). This is a country in the South-East of India occupying the eastern coast. It extended from Orissa to Dravida. Its capital was दन्तपुर the modern Râjamahendrî on the Godâvarî, about 233-250 miles to the South-West of Ganjam.

,, L. 23. एकान्त is used in the sense of अत्यन्त.

,, L. 24. यथाकथंचित्— With great difficulty.

,, L. 25. स्वामिनमनृणं &c.— I shall free my master from the debt &c. He believed that his master had contracted a debt as it were, when he had promised to give his daughter in marriage to Vatsa Râja, and that he was under an obligation to do it. So he thought of stealing away with her and taking her to Vatsa. प्रलयकालदारुण &c.—As dreadful to look at as the time and scene of universal destruction at the end of the Hindu Kalpa.

P. 3. L. 1. अवस्कन्दसंभ्रम— The flurry and bustle of the assault, sudden attack, tumult. अपवाह्य— Taking away.

,, L. 2. आटविक— A forest king. वनराजा.

,, L. 3. अगस्त्यतीर्थ— A holy place consecrated to the sage अगस्त्य.

,, L. 5. निपुणम्— An adverb. Minutely, carefully.

,, L. 9. कौशाम्बी— At present called Kosam, a village on the Jumna about 31 miles South-West from the fort of Allahabad.

,, L. 12. तत्रभवान्— पूज्यः. Respected. This word and अत्रभवान् are both used in this sense. Also सभवान्. अत्रभवान् is used when the person spoken of is present and तत्रभवान् is used when he is absent.

,, L. 14. परिचर्या— Service, worship.

,, L. 18. घनबन्धन— A quibble is intended on the word घन. (1) Fast; (2) Cloud. कन्या— Used in a double sense. (1) A daughter; (2) The constellation Virgo. ग्रहण— Similarly means a physical act of seizing and likewise crossing in the (sun's) course. परा— (1) High-

Digitized by Google

est; (2) Beyond, yonder. तुला— (1) Eminence, importance, exaltation; (2) The constellation Libra.

P. 3. L. 19. अधिगत— Obtained. स्वधामा— The word धामन् is used in the double sense of (1) तेजस्, Lustre, brilliancy; and (2) House, place, country.

ACT I.

P. 3. L. 25. अविकारिता —Constancy. परिगता— Known.

P. 4. L. 1. निर्व्यूढा— Finished, completed, shown.

,, L. 2. निर्व्याज— Adjective qualifying धर्म. It means practised without any fixed purpose or hope.

,, L. 3. विदूषक— Is thus defined :—

"कुसुमवसन्ताद्याभिधः कर्मवपुर्वेषभाषाद्यैः ।
हास्यकरः कलहरतिर्विदूषकः स्यात्स्वकर्मज्ञः ॥" इति.
सा० द० ३ प० ७९. का०

,, L. 4. दास्याः पुत्रः— This word is used in contempt of बन्धनहतक, wretched confinement. It does not mean actually the son of a kept woman.

,, L. 5. नवग्रह— Newly or just caught. The same expression occurs in the Das'akumâracharita, Uttarakhanda. Uchchhvâsa. I.

"स्थानासनभोजनेष्वपि द्विप इव नवग्रहो बलवतीभिर्यन्त्रणाभिरुद्वेजितः" &c.

,, L. 6. प्रतिस्खलत्— Stumbling. शून्यदुष्कर &c.— This expression or epithet and the whole that follows it up to अनुवाचयसि defy all attempts to render it clear and intelligible. This is one of the knotty points and passages in the play. A Pandit from Tanjore explains it however as follows :—

"शून्यं विषयग्रहणेऽपटु· दुःखं राति आदत्ते इति दुःखरं· (He reads दुःखर instead of दुष्कर) पिशुनयत्संतापसूचकं च यद्धृदयं तस्य संतापो यस्य स इति व्यधिकरणो बहुव्रीहिः· दुष्करमिति पक्षे (पाठे) दुर्धरमित्यर्थः· अनिद्रासुखं निद्रासुखस्याभावः अनिद्रासुखम्· अर्थाभावेऽव्ययीभावः"

The above is far fetched. Considering the general style of the play, one would not expect such a passage to find its way into it. The reading therefore is perhaps corrupt. There is a possibility of its being

Digitized by Google

